RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23

॥ ओ३म् ॥

दुर्जनः परिहर्तव्यो
विद्ययाऽलङ्कृतोऽपि
सन् ।
मणिना भूपितः सपः
किमसौ न
भयंकरः॥५३॥

(नीतिशतकम्)

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥

जायं हीमति गण्यते गतरुची
दम्भः शुची कैतवं
शूरे निर्गुणता ऋग्रजी विमतिता
दैन्यं प्रियालापिनि ।
तेजस्विन्यवलिप्तता मुखरिता
धक्तर्यशक्तिः स्थिर
तत्को नाम गुणो भवेत्स गुणिनां
यो दुर्जनै द्वितः॥५४॥

(नीतिशतकम्)

卐 वर्षम्-११ 卐 अंकः-०५ (२४५) 卐 १ सितम्बरमासः २०२१तः १५ सितम्बरमासः २०२१ पर्यन्तम् 卐 विक्रमसंवत्-२०७८ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२१ 卐 पृष्ठम्-८

## पतंजलिविश्वविद्यालयतः निर्गताः स्नातकाः विश्वे प्रसारयिष्यन्ति ज्ञानस्य प्रवाहम्-स्वामी रामदेवः

26 अगस्त 2021

पतंजलिविश्वविद्यालयस्य विशालसभागारे वार्षिकोत्सवः 'अभ्युदयः आयोजितः। तत्र माननीयकुलाधिपतिः स्वामी रामदेवः यशस्वी कुलपतिः आचार्य बालकृष्णः उपस्थितौ।तत्र स्नातकानां समावर्तनसंस्कारः अपि जातः । अन्ये प्रतिकुलपतिः, परामर्शदात्रीसमितेः महामंत्री,



कुलानुशासिका, सह-कुलानुशासकः, परीक्षानियंत्रकः वित्ताधिकारी चेत्यादिभिः सहितानां विद्वज्जनानाम् उपस्थितौ वैदिक मंत्रोच्चारणेन कार्यक्रमस्य शुभारंभः जातः ।अभ्युदयस्य कार्यक्रमः प्रातः यज्ञतः आरभ्य सायंकालपर्यन्तं विभिन्नसांस्कृतिककार्यक्रमाणां माध्यमेन पूर्णम् अभूत्। प्रतिकुलपतिः डॉ0 अग्रवालः विद्यार्थिनः सम्बोधयन् उक्तवान् यत् भवद्भिः अन्तःस्थिताः असीमितसम्भावनाः

शेषभागः तृतीयेपुटे

## 'पं. मधुसूदन-ओझाप्रतिपादितं वृष्टिविज्ञानम्' इतिविषयमधिकृत्य राष्ट्रिया संगोष्ठीसम्पन्ना

जयपुरम् (राजस्थानम्) महामहोपदेशक-समीक्षाचक्रवर्ति-पं. मधुसूदन- ओझा महाभागानां जन्म महोत्सवस्यशुभावसरे जन्माष्टमीदिवसे (अगस्तमासस्यत्रिंशत्तमेदिनाङ्के) विश्वगुरुदीप आश्रम शोधसंस्थानजयपुरस्यतत्त्वावधानेडॉ. राधाकृष्णन् केन्दियपुस्तकालयस्यसभागारेसमायोजिता 'पं. मध




ुसूदन ओझापतिपादितं वृष्टिविज्ञानम्' इतिविषयिणीराष्ट्रिया संगोष्ठीसु सम्पन्ना। संगोष्टया आध्यक्ष्य डॉ. सर्वपल्लीराधाकृष्णान् राजस्थान आयुर्वेद विश्वविद्यालयजोधपुरस्यपूर्व कुलपतिभिःप्रो. बनवारीलाल गौड महोदयनिाढम्। राजस्थानसर्वकारस्य कला एवं संस्कृतिविभागस्य संयुक्तशासनसचिवाःश्रीयुत् पंकज ओझामहोदयाः मुख्यातिथय आसन् राजस्थानसंस्कृत अकाद याःपूर्वाध्यक्षापो. सुषमासिंघवी महोदया, 'श्रीसंजयशर्मा संग्रहालय एवं शोधसंस्थान श्स्य सचिवाःश्रीतिलकशर्माणश्च विशिष्टातिथयः आसन्। संगोष्ठयां मु यवक्तारः आसन - पं. मधुसूदन ओझाशोधपीठजयनारायणव्यासजोधपुरविश्वविद्यालयस्यपूर्वनिदेशकाःपो. नरेन्द्र अवस्थी महोदया, विश्वगुरुदीप आश्रम शोधसंस्थानजयपुरस्यवेद विज्ञान विभागाध्यक्षाःपो. रामदेवसाहू महोदयाः, केन्दियसंस्कृतविश्वविद्यालयजयपुरस्य ज्योतिषविभागाध्यक्षाःपो. श्यामदेवमिश्च महोदयाः, राजस्थानविश्वविद्यालयजयपुरस्यपूर्वविभागाध्यक्षाःपो. राजेन्द्रप्रसादशाणः, जगद्गुरुरामानन्दा-

शेषभागः तृतीयेपुटे

## देववाणीपरिषदः 46तमः संकल्पनादिवससमारोहः

-ऋषिराजपाठकः

21.08.2021 तमे दिनाङ्के आर 6 वाणीविहारे उत्तमनगरे दिल्ल्यां रमालये देववाणीपरिषदः षट्चत्वारिंशः संकल्पनादिवससमारोहः समनुष्ठितः। आदौ ऋषिराजपाठककृतेन सामगानेन कार्यक्रमः प्रारब्धः। एतदनु माधवेन्द्रगौतमः, वरदशुक्लः, रम्या शुक्ला, शिवाङ्गी शुक्ला, डॉ. प्रवीणरायश्च



श्लोकपाठं कृतवन्तः। देववाणीपरिषदा प्रकाशितस्य जि.एस्.मूर्त्ति-कृतस्य पुत्रिकागृहम् इत्यस्य लोकार्पणं श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतिना सारस्वतातिथिना आचार्यरमेशकुमारपाण्डेयेन कृतं लेखकाय प्रकाशकाय पाठकेभ्यश्च वर्धापनानि दत्तानिद्य पुत्रिकागृहम् इति हेनरिक इब्सन इत्यस्य डॉल्स हाउस इति आङ्ग्लनाटकस्य संस्कृते अनूदितं रूपकमस्ति। बैङ्गलूरुतः श्रीजिस्.एस् मूर्त्तिना एतद्रूपकस्य पूर्वपीठिका चर्चिता ग्रन्थप्रकाशनाय परिषदे कृतज्ञता दृश्याङ्कनमाध्यमेन अभिव्यक्ताद्य मुख्यातिथिना केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिना आचार्येण के. बी. सुब्बारायुडुना परिषदः संकल्पनादिवससमारोहं प्रति शुभाशंसनं कृतम्। डॉ. प्रवीणरायः विद्यावारिधिरित्युपाधिमधिगतवान् इति विषये देववाणीपरिषदा तस्य ऊर्णावस्त्रार्पणेन अभिनन्दनं कृतम्। परिषत्संरक्षिकया श्रीमत्या रमादेव्या अतिथीन् प्रति कृतज्ञता अभिव्यक्ता। आचार्यरमाकान्तशुक्लेन अध्यक्षीयभाषणपुरस्सरं भाति मे भारतम् इति गीतं स्वमेघध्वनिना गीतम्द्य धन्यवादज्ञापनं परिषदः आजीवनसदस्येन डॉ. अभिनवशुक्लेन कृतम् ऋषिराजपाठकेन स्वध्वन्यङ्कितगीतानि अपि श्रावितानि येषु आचार्यरमाकान्तशुक्लकृतं वन्दनीयास्ते इति गीतं नौटङ्कीशैल्यां श्रावितम्।

## अखिलभारतसंस्कृतकविसम्मेलनम् आभाषिरूपेण समायोजितम्

कान्तलूरु (कान्तलपुरम्) शाला नाम विद्यास्थानं केरळेषु तिरुवनन्तपुरे पुरा बहूनि वत्सरशतकानि यावत् नळन्देव तक्षशिलेव च व्यराजतेति, सा खलु साम्प्रतं कतिपयानां विद्याव्यसनिनां परिश्रमेण पुनरुत्थिता भारतीयानां प्राचीनानां चतुष्षष्टिसंख्यानां विद्यानां विलासनाय प्रवर्तत इति, राष्ट्रस्तरीया



अच्युतभारतीस्वामिपादाः प्रो.राधावल्लभत्रिपाठी प्रो.अभिराजराजेन्द्रमिश्रा प्रो.सुब्बरायुडु डॉ. रमाकान्तशुक्ल

अन्ताराष्ट्रस्तरीया नैका नानाविषयिकाः सभा असकृदस्या ब्योनि प्राचाल्यन्त प्रचाल्यन्ते चेति च तावत् विदितं भवतुतराम् ॥

अधुना च भारतराष्ट्रस्य स्वातन्त्र्यप्राप्तेः परं पञ्चसप्ततितमं संवत्सरमिमं सोत्सवयितुमनसः, किञ्च देशीयसंस्कृतभाषादिनोत्सवमाचरिष्यन्तः, पुनश्च केरळस्य श्रणामहोत्सव समुचितमाघोषयितुकामा वयं कान्तलूरुशालायाः कार्यकर्तारो मासस्यास्य पञ्चविंशे दिनाङ्के संस्कृतकविश्रेष्ठभूयिष्ठा काव्यप्रस्तुतिसभा सञ्चालिता। यत्र महान्तो विंशत्यधिकाः कविप्रवराः कविताः समायाताः, आचार्यविष्णुनम्पूतिरिविरचितस्य सारस्वतनाम्नः प्रतिनवस्य महाकाव्यस्य लोकार्पणञ्च अपि कृतम् ।

शेषभागः तृतीयेपुटे

# केन्द्रीय-संस्कृत-विश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरे संस्कृतसप्ताह-समारोहे

## विदुषामभिभाषणम्, छात्राणां प्रतियोगिताः, संस्कृतकलश-शोभायात्रा च

**डॉ.अनिलकुमारः**

देवप्रयाग। संस्कृतभाषाया महत्त्वं यथा शास्त्रेषु वर्तते तथैव लोकेऽपि दरीदृश्यते। अस्यां न केवलं मानवस्य आध्यात्मिक-सामाजिक-नैतिक-राजनैतिकविकासाः परिलक्ष्यन्ते, अपितु अत्याधुनिकविकासोऽपि अनयैव सम्भवति। आयुर्वेदस्य चिकित्सायाम्, धर्मशास्त्रस्य न्यायालये, वास्तुज्योतिषादि-शास्त्राणां भवननिर्माणे, सिद्धान्तज्योतिषस्य गणितशास्त्रे, साहित्यस्य



विविध-कलासु सङ्गीते अभिनये च यथा आवश्यकता भवति तत्सर्वमिदानीमपि सर्वविदितं नास्ति। अतः मानवस्य भौतिकोन्नतये संस्कृते विद्यमानानि यानि तत्त्वानि सन्ति तेषां सर्वेषां समाजाय समाजस्य विकासाय च प्रकाशनमावश्यकम्, येन ज्ञानेन पाश्चात्यानुकरणशालिनः स्वसभ्यतायाः संस्कृतेश्च ज्ञानेन सह जीविकोपार्जनस्य साधनान्यप्यस्यां भाषायामन्वेष्टुं शक्नुवन्ति। अस्याः भाषायाः महत्त्वं लोके निरन्तरं प्रसरेदिति धिया संस्कृतसप्ताहस्यायोजनं सर्वेषु विद्यालय-महाविद्यालय-विश्वविद्यालयेषु प्रतिवर्षमाचर्यते। अस्मिन् वर्षे भारतस्य स्वातन्त्र्यामृत-महोत्सवावसरे संस्कृतसप्ताहे भारत-वर्षे सर्वत्र विदुषां संस्कृतस्योपयोगिताविषये भाषणानि, छात्राणां विभिन्नाः प्रतियोगिताश्चानुष्ठिताः। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरेण अगस्तमासस्य 21दिनाङ्कात् 27 दिनाङ्कपर्यन्तम् अस्य संस्कृतसप्ताहस्य महदायोजनं विहितम्। तत्रोद्घाटने मुख्यातिथित्वेन तिरुपतिस्थस्य राष्ट्रियसंस्कृतविश्वविद्यालयस्य ज्योतिषविभागाध्यक्षेण आचार्यराधाकान्तठाकुरेण नूतनशिक्षानीतिप्रसङ्गे कथं संस्कृताय स्थानं महत्त्वं च भारतसर्वकारेण प्रदत्तम्, कथमत्र मानवजीवनोन्नतिः संरक्षिता इत्यस्मिन् विषये स्वविचाराः प्रस्तुताः। नूतनशिक्षानीतौ पाश्चात्यभाषायाः स्थाने संस्कृतभाषायाः तथा प्रान्तीयभाषाणां च यथा स्थानं निर्धारितं तद् अस्माकं भारतीयानां कृते गौरवस्य विषयः, यतोहि अनेन भारतीयेषु स्वसंस्कृतिविषये सभ्यताविषये च रुचिर्वर्धिष्यते, देशभक्तिभावना च मनसि दृढा भविष्यति। मुख्यवक्तृरूपेण ओडिशाप्रदेशतः समागतेन लोकभाषाप्रचारसमितेः अध्यक्षेण तथा सरस्वती-शोधसंस्थानस्य निदेशकेन डा. सदानन्ददीक्षितेनोक्तं यत् संस्कृतं विना मानवस्य न कदापि उन्नतिर्भवितुं शक्नोति। भारतवर्षे यदि प्रत्येकं संस्कृतस्य प्राध्यापकः स्वशिष्याणां जीवनं संस्कृतमयं विधास्यति तदा भारतं पुनः विश्वगुरुः निश्चितमेव भविष्यति। प्रथमं स्वपरिवारं तदनु स्वशिष्यान् संस्कृतस्य महत्त्वं बोधयामश्चेत् संस्कृतस्य प्राचीनं ज्ञानं सुरक्षितं भविष्यति अन्यथा विदेशेभ्यो जनाः आगत्य अस्माकं संस्कृतम् अस्माकं संस्कृतिं च अस्मान् शिक्षयिष्यन्ति। परिसरस्य निदेशकेन कार्यक्रमस्याध्यक्षेण प्रो.बनमालीबिश्वालमहोदयेनावसरेऽस्मिन् संस्कृतस्य या प्राचीना रचना-परम्परा वर्तते वैदिकी, पौराणिकी लौकिकी च तत्र संस्कृतस्य कीदृशं वैज्ञानिकं महत्त्वं विद्यते, तथा आधुनिकरचनाकाराणां रचनासु च कथं मानक-संस्कृतस्य निदर्शनं विलसति तत् सर्वं विस्तरेण प्रतिपादितम्। यथा प्राचीनकाले संस्कृतरचनासु प्रौढ-पाण्डित्यमासीत् परञ्चाधुनातने समाजे संस्कृतस्य प्रचाराय प्रसाराय तथा तत्र जनानामाकर्षणाय बोधाय च न तथा प्रौढभाषा आधिक्येन अपेक्ष्यते। आधुनिकसाहित्ये याश्च रचना दृश्यन्ते तत्र राष्ट्रस्य भावना अपि विस्तरेण समाहिता परिलक्ष्यते। संस्कृतं लोकभाषा कथं भवेत् तस्मिन् विषयेऽपि अस्माभिश्चिन्तनीयः इत्येवम्भूता विचाराः तैः प्रस्तुताः। परिसरीयप्राध्यापका अपि अवसरेऽस्मिन् संस्कृतस्य महिममण्डनं कृतवन्तः। एवमेव अगस्तमासस्य 22तमे दिनाङ्के स्नातक-स्नातकोत्तर-कक्षाणां कृते 'कोरोनाकाले संस्कृतशिक्षणप्रसङ्गे सौविध्यम् असौविध्यञ्चे'ति विषयिणी निबन्धप्रतियोगिता आयोजिता, यस्यां च देवज्योतिकुण्डुः (पश्चिमबङ्गतः) प्रथमं, साध्वीदेवाश्रिता (उत्तराखण्डतः) द्वितीयं, पुनीतकुमारः (उत्तराखण्डतः) तृतीयञ्च स्थानं क्रमशः लब्धवन्तः। 24 तमे दिनाङ्के गीतायाः द्वितीयाध्यायस्य सस्वरश्लोक-कण्ठपाठ-प्रतियोगिता (6 कक्षातः 12 कक्षापर्यन्तं छात्राणां कृते) अन्तर्जालीयमाध्यमेन समायोजिता। अस्यां प्रतियोगितायां श्रुतिसंस्कृतिः (प्रयागराजतः, उत्तरप्रदेशतः), मोनिकानौगाइं (उत्तराखण्डतः) संयुक्तरूपेण प्रथमं स्थानम्, देविकामण्डलः (पश्चिमबङ्गतः) द्वितीयं स्थानम्, अमनभट्टः, रोहितपाण्डेयस्च (उत्तराखण्डतः) संयुक्तरूपेण तृतीयं स्थानं लब्धवन्तः। संस्कृतस्य प्रचाराय प्रसाराय च 27तमे दिनाङ्के प्रातः11वादने परिसरस्य निदेशकमहोदयैः सह सर्वैः प्राध्यापकैः कर्मचारिभिः तथा कैश्चित् शोधछात्रैश्च संस्कृतकलश-शोभायात्रा सम्पूर्णदेवप्रयागे समाचरिता। तस्मिन्नेव दिने 3:00 वादने सम्पूर्तिसमारोहे अन्तर्जालमाध्यमेन मुख्यातिथित्वेन कोलकाताविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेण प्रो. सत्यजितलायकमहोदयेन संस्कृतस्य शास्त्रेषु मानवकल्याणाय कथं चिन्तनं विद्यते तत् सर्वं विस्तारपूर्वकं प्रस्तुतम्। तैरुक्तं यत् रामायणमहाभारतप्रभृतिषु ग्रन्थेषु राष्ट्ररक्षणे सर्वे उपाया निगदिताः सन्ति, गीतायां स्वकर्त्तव्यपालनपरायणता प्रदर्शिताऽस्ति। साहित्यिकग्रन्थेषु रामादिवत्प्रवर्तितव्यं न रावणादिवदिति शिक्षा प्रदत्ता वर्तते।

अतोऽस्माभिस्सर्वैः संस्कृतग्रन्थाः सेवनीयाः। बडौदाविश्वविद्यालयस्य संस्कृतस्याचार्याः महान्तः कवयः कथाकाराः प्रो.रवीन्द्रकुमारपण्डामहोदया मुख्यवक्तृरूपेणात्रोपस्थिता आसन्। भारतीयसमाजे ये सम्प्रति विकाराः सञ्जातास्तेषां विनाशः संस्कृतप्रचारेण संस्कृतस्याध्यनेन चौव सम्भवति, संस्कृतग्रन्थेषु बहवो विषया अनुसन्धानयोग्याः सन्ति, तेषाम् अनुसन्धानेन अद्यतनीयानां समस्यानां समाधानं भविष्यतीति कथने नास्ति काचिदतिशयोक्तिः। भारतस्य भविष्यत्संस्कृते एव सन्निहितमस्ति। परिसरस्य निदेशकेन प्रो.बनमालीबिश्वालेन अवसरेऽस्मिन् संस्कृतस्यैका विस्तृतपरम्परा पद्यैः प्रस्तुता, यत्र संस्कृतस्य महत्त्व-विषये विस्तरेण चर्चा कृताऽसीत्। अस्य सम्पूर्णसंस्कृतसप्ताहकार्यक्रमस्य संयोजनं डा.शैलेन्द्रप्रसादउनियालः, डा.अनिलकुमारश्च कृतवन्तौ। अस्मिन् कार्यक्रमे प्रतियोगितासञ्चालने डा.सच्चिदानन्दस्नेहि-डा.कृपाशङ्करशर्म-डा.अमन्दमिश्र-डा. दिनेशचन्द्रपाण्डेय-डा.जनार्दनसुवेदि-डा. मनीषशर्म-श्रीनवीनडोबरियाल-डा. गौतमचौधरी-श्रीपङ्कजकोटियालाश्च स्व-स्वदायित्वं निर्व्यूढवन्तः। सम्पूर्णे कार्यक्रमे अन्ये सर्वे परिसरीयप्राध्यापकाः अपि समुपस्थिताः आसन् तथा स्व-स्वदायित्वं सम्पादितवन्तः।

---

# संस्कृतसप्ताहमहोत्सवस्य समापनसमारोहः पुरस्कारवितरणं च

19/08/2021 तमे दिनाङ्के केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपाल परिसरस्य लब्धप्रतिष्ठ शिक्षाविद् प्रो. जे .भानुमूर्तेः




अध्यक्षतायां संस्कृतसप्ताहमहोत्सवस्य उद्घोषः परिसरे नाट्य अनुसंधान केन्द्रस्य यशस्वियुवसंगीतविदुषः मधुरगायनेन वादनेन सह भवभूतिप्रेक्षागृहे उत्साहेन आयोजितः । अस्मिन् समारोहे मुख्यातिथिरुपेण केन्द्रीयसंस्कृत विश्वविद्यालयस्य श्रीराजीवगांधिपरिसरस्य, (शृंगेरी)था सारस्वतातिथिरूपेण श्री ला.ब. शास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य क्रमशः आचार्य सुब्बराय भट्टः, आचार्य अशोक थपलियालः आभासिमाध्यमेन महत्त्वपूर्णविचारान् उपस्थापितवन्तः।

चर्चितमीमांसकः आचार्यभट्टः भारतीयभाषामहत्तां प्रतिपाद्य संस्कृतभाषिकप्रयोगपक्षान् प्रति बलं दत्तवान्। ज्योतिषविद् आचार्य थपलियालः संस्कृतं वास्तुशास्त्रम् आधृत्य स्वतात्विकवार्तां स्थापितवान् उद्घाटनसत्राध्यक्षः शिक्षाशास्त्री - साहित्य - दर्शनस्य दुर्लभसमकालीन त्रिवेणी यशस्वीनिदेशकः आचार्यः जे.भानुमूर्तिः औपनिवेशिकभारते संस्कृतस्य दशां दुर्दशां प्रति आशाम् अकरोत् यदधुना स्वतन्त्रभारते संस्कृतस्य भविष्यं सर्वथा उज्ज्वलमेव प्रतीयते । व्याकरणशास्त्री प्रो. सुबोध शर्मा विविधप्रतियोगिता आयोजिता। आभासिमंचस्थे सभागारे उपस्थितच्छात्र- छात्राः संकायस्य सदस्यानां वाचिकं स्वागतं कृतम्। महोत्सवस्य संयोजकः साहित्यशास्त्र मर्मज्ञः प्रो. सनन्दन त्रिपाठी , साहित्य विभागस्य डा. अजय कुमार मिश्रः क्रमशः आचार्य निदेशकः , आचार्य शर्मा चेत्यनयोः माल्यार्पणं कृत्वा स्वागतम् अकुर्वन्। व्याकरणशास्त्रस्य युवा नदीष्ण विद्वान् आचार्य प्रदीप पाण्डेयः, साहित्य विदुषी आचार्य मोहिनी अरोडा च धन्यवादं ज्ञापितवन्तौ। शान्तिपाठेन सप्ताहोद्घाटनसत्रं सम्पन्नम्। आयोजनाय विश्वविद्यालयस्य आदरणीयः कुलपतिः कुलसचिवश्च आभारम् अभिव्यक्तवन्तः। तकनीकीसहयोगं जे.आर .एफ.मेधाविच्छात्रः श्री रोहित पचोरी ,कर्मचारी श्री साहिल युवा उत्साही विद्वान् डा. दाताराम पाठकः चाकुर्वन् ।



# अमेरिकायामायोजितं विश्वसंस्कृतकविसम्मेलनम्

महादेवदेशपाण्डेः

अगस्तमासस्य २८ दिने अमेरिकायां Celebrating Global Sanskrit Poetry इति नाम्ना विश्वसंस्कृतकविसम्मेलनं वैदिकगणेन पुरस्कृतं Indica US। इत्यनया संस्थया आयोजितं चासीत्। अस्य नेतृत्वं न्यूयॉर्कनगरे वसता श्रीमता




कुशाग्र-अनिकेत-महोदयेन कृतम् । अस्य आध्यक्ष्यं च प्राचार्येण माधव देशपाण्डे महोदयेन विहितम् । अस्य सम्मेलनस्यारम्भे कुशाग्रमहोदयेन एतस्य वैश्विकत्वं प्रतिपादयता सर्वेषां सहभागिनां नामानि निर्दिष्टानि, परिचयश्च कारितः । अत्र केचन भारदेशीयाः, केचन अमेरिकावासिनः, केचन च इंग्लण्डदेशवासिनः आसन् । कार्यक्रमस्यादौ Indica। cademy इत्यस्याः संस्थाया प्रशासकेन प्राचार्येण नागराज-पटुरि-महोदयेन काव्यसंगोष्ठीनां महत्त्वं प्रतिपादितम् । भारते विविधासु भाषासु कविभिः काव्यानि विरच्यन्ते, काव्यसंगोष्ठीषु च विविधेषु नगरेषु तानि काव्यानि प्रस्तूयन्ते, रसिकैश्चास्वाद्यन्ते इति तैर्निवेदितम् । लिखितस्य काव्यस्य वाचने यावानानन्दोऽनुभूयते ततोऽप्यधिकतर आनन्दः काव्यस्य श्रवणेऽनुभूयते । विभिन्नानां काव्यच्छन्दसां पठने श्रवणे च वाचनादधिको रसानुभवो भवति इति तैरुक्तम् । तदनन्तरं प्राचार्यैः माधव-देशपाण्डे-महोदयैः स्वीयमध्यक्षीयं भाषणं कृतम्।

जगतः प्राचीनभाषासु यद्यपि संस्कृतस्यान्तर्भावो भवति, तथापि संस्कृतभाषा मृतेति प्रवादो न सत्यतामावहति। अस्यां भाषायामद्यावधि शास्त्रचर्चा प्रवर्तते, काव्यानि लिख्यन्ते, नाटकानि रङ्गमञ्चेषु प्रस्तूयन्ते, वार्ताः श्रूयन्ते, सम्भाषणेष्वपि भूयांसो जनाः प्रयतन्ते। ईदृशीयं भाषा कथं मृता भवेत्। अस्मिन् संस्कृतकविसम्मेलने प्रायशो युवानः कवयः स्वकाव्यानि प्रस्तोष्यन्तीति तैः कथितम्, स्वीयाश्च काश्चन कृष्णकाव्यरचनाः सानुवादं श्राविताः। तदनन्तरं श्रीमता नरेश-चुन्तूर-महोदयेन आधुनिकसंस्कृतकवीनां कृते काश्चन सूचनाः कृताः। आधुनिकसंस्कृतकविभिर्न केवलं प्राचीनकवीनामनुकरणं न कर्तव्यम्। तैः आधुनिकविषयाणामपि स्वकाव्येऽन्तर्भावः कार्यः। आधुनिकभाषासु यानि च्छन्दांसि अभङ्ग-दोहा-चौपाई-इत्यादीनि प्रयुज्यन्ते, तेषामपि प्रयोगः स्वीये संस्कृतकाव्ये करणीयः। यथा गङ्गामधिकृत्य संस्कृतकाव्यानि विरच्यन्ते, तथैव अमेरिकावासिभिः संस्कृतकविभिः मिसिसिपीनदीमधिकृत्यापि स्वकाव्यानि रचयितव्यानि। इत्यादयो बह्व्यः विचारार्हाः सूचनास्तैः कृताः। इतः परं श्रीमता सर्वेश-तिवारीमहोदयेन, श्रीमता हर्षितमिश्रेण, श्रीमता नाहतामहोदयेन, श्रीमता राधाकृष्णप्रख्यमहोदयेन, श्रीमता प्रेमरल्लबन्दीमहोदयेन च स्वीयानि काव्यानि श्रावितानि, हिन्दीभाषया आङ्ग्लभाषया वा तेषां काव्यानामर्थः स्फुटीकृतः। कार्यक्रमस्यान्ते समायोजकेन श्रीमता कुशाग्रमहोदयेन सर्वेभ्यो धन्यवादाः प्रदत्ताः स्वीयं चौकं पद्यं श्रावितम्। एवंप्रकारेणेदं विश्वसंस्कृतकविसम्मेलनं सुश्रवणीयं रसपूर्णं चासीत् । एतादृशानि संस्कृतकविसम्मेलनानि भारताद् बहिरपि पुनः पुनः करणीयानि, येन भारताद् बहिः निवसतामपि संस्कृतकवीनां परिचयः प्रोत्साहनं च जायेत।

---

प्रथमपुटस्य शेषभागः

## अखिलभारतसंस्कृतकविसम्मेलनम् आभाषिरूपेण....

सभामिमां तत्रभवन्तः संस्कृतकविकुलपतयः प्रो. अभिराजराजेन्द्रमिश्राः उद्घाटनम् अकरोत् । आध्यक्षञ्च परमादरणीया राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिचराः प्रणीतनैककाव्याः प्रो. राधावल्लभत्रिपाठिवर्या निर्व्यूढवन्तः। परमपूजनीयाः श्री नटुबिल् मठाधिपतयः अच्युतभारतीस्वामिपादाः (पुष्पाञ्जलिस्वामिया) कवितां प्रस्तुत्य कविसम्मेलनमनुग्रहीतवन्तः। समादरणीयाः केन्द्रीयसंस्कृत विश्वविद्यालयस्य बहुमान्यकुलपतयः प्रफ. सुब्बरायुडुव मुख्यातिथयः सभामलङ्करिष्यन् । महात्मन्, अनघ सभाशोभासमृद्धिकरी भवत उपस्थितिः तत्र अवर्तत।।

प्रो. विष्णुनम्फूतिरि सञ्चालकः आसीत्। संयोजकस्तावत् प्रो.पि.सि. मुरळीमाधवन्. वरिष्ठनिदेशकः, कान्तलूरुशाला, समयः अपराह्ने 3.00 वादनतः 6.00 वादनं यावत् सञ्चालिते 25.08.2021 तमे दिनाङ्के समायोजिते कविसम्मेलने भागग्रहीतृषु कविषु डा. रमाकान्तशुक्लः (दिल्ली),डा. हर्षदेवमाधवः (गुजरातम्) डा. राजाराम शुक्लः (उत्तरप्रदेशः), डा. सतीश कपूरः (जम्मु), श्रीमती ऋता त्रिवेदी (गुजरातम्) प्रो. राधाकान्त ठाकूरः (तिरुपतिः) डा. मधुसूदनपेन्ना (महाराष्ट्रम्),डा. बलराम शुक्लः (पिंला)डा.के.वि. वासुदेवन् (केरळम्), डा. वरलक्ष्मी (तेलङ्काना)प्रो.पि.सि. मुरळीमाधवन् (केरळम्), डा. सि. एस्. राधाकृष्णन् (तमिळनाडू), डा. प्रवीण पाण्ड्यः (राजस्थानम्), डा.वि.आर् मुरळीधरन् (केरळम्), श्रामती उपाराणी सङ्का (तेलुङ्काना),श्रीमती सुधा इ.के. (केरळम्), डा.इ. आर्. नारायणन् (केरळम्), डा. परास्बा श्री योगमाया (ओडीसा ),डा.इ.एम्. राजन् (केरळम्), डा. विष्णुनम्पूतिरि (केरळम्) डा. मुरळीकृष्ण (कर्णाटकम्)समुपस्थिताः आसन् । तत्र विद्यालयानां ,महाविद्यालयानां ,विश्वविद्यालयानां च छात्राः,शोधच्छात्राः, शिक्षकाः, प्रवक्तारः, कुलपतयः, अन्ये संस्कृतानुरागिणः सामाजिकाः वैदेशिकाश्च समुपस्थिताः आसन्। जूममींटिगद्वारा कार्यक्रमः असौ सञ्चालितः जातः।

---

प्रथमपुटस्य शेषभागः

## विश्वविद्यालयतः निर्गताः स्नातकाः विश्वे....

जागरित्त्वा वैदिकसंस्कृतेः राजदूताः भूत्वा पूर्णविश्वस्य मार्गदर्शनं करणीयम्। स्वामी परमार्थदेवः विद्यार्थिभ्यः स्वीयं आशीर्वादं प्रदाय अनवरताखण्ड-प्रचण्डपुरूषार्थ कर्तुं प्रेरणाम् अदात्।

पाठ्यक्रमसमन्वयक डॉ0 निधीश यादवः, डॉ0 संजयः, श्री चन्द्रमोहनः 'चरैवेति-चरैवेति' संदेशं दत्तवन्तः ।संकायाध्यक्षः प्रो0 कटियारः,कुलानुशासिका डॉ0 साध्वी देवप्रिया, वरिष्ठ सी0 ए0 श्री गिरीश आहूजा च विद्यार्थिनां प्रौत्साहनम् अकुर्वन्। कुलाधिपतिः स्वामी रामदेवः विद्यार्थिभिः सिद्धांतानुरूपं स्वीयपुरूषार्थेन नव-नवसृजनस्य प्रेरणां दत्त्वा समाजे योगस्य अनुप्रयोगं प्रति बलं दत्तवान्। समन्वयकः योग विज्ञानप्राध्यापक डॉ0 नरेंद्र सिंहः कार्यक्रमस्य सफलसंचालनम् अकरोत् विद्यार्थिभ्यः उज्ज्वलभविष्याय शुभकामनाः प्रदत्तवान्।

---

प्रथमपुटस्य शेषभागः

## 'पं. मधुसूदन ओझाप्रतिपादितं....

चार्यराजस्थानसंस्कृत-विश्वविद्यालयस्यवेदविभाग- स्यसेवानिवृत्त-आचार्याःपो. ल बोदरमिच महाभागाश्च राजस्थानसंस्कृतशिक्षा-विभागस्यपूर्वनिदेशकाःपो. कैलाशचतुर्वदिनः, राजस्थानसंस्कृत अकाद यानिदेशका श्रीसंजयझाला चापि संगोष्ठयाम् उपस्थिता आसन्। महन्तहरिशंकरदासवेदान्तिनामाशीर्वचनेन संगोष्ठयाःसमापनं विहितम्। संगोष्ठयाः संचालन डॉ. चन्दपकाशशर्मा - डॉ. रघुवीरपसादश्च कृतवन्तौ।

राष्ट्रियसंगोष्टयामस्यां वृष्टिविज्ञानसन्दर्भ पं. मधुसूदन ओझाविरचिताया का बया अ भोवादग्रन्थस्य च विशिष्टसिद्धान्तानां मीमांसां विधायविद्वद्भिःवृष्टिपक्रियासन्दर्भनूतनमनुसंधान प्रस्तुतम्। गर्भधारण-गर्भदोहद-गर्भपसव-गर्भपरीक्षणादिविषयाणां गभीरचिन्तनेनसह ग्रहनक्षत्रादियोगानांविविधभौगोलिक-पाकृतिकनिमित्तानां एतत्सन्दर्भितोपयोगिताविषयेविदुषां विचाराःवस्तुतः प्रशस्या आसन्। आधुनिक मौसमविज्ञानस्य कार्यशैल्यातुलनया पं. ओझापतिपादितपकियायावैज्ञानिकता प्रतिपादंसंसाधितं यत्पाक्तनमिदं विज्ञानमाधुनिकविज्ञानेन न्यूनतरनास्ति।

---

# संस्कृते वर्तमाने किं आवश्यकम्



संस्कृतस्य माहात्म्यन्तदैव प्रसरिष्यति यदा भारतभूमितो स्वार्थायुक्तदुर्गन्धवासितं वातावरणं समाप्तिं यास्यति। अशुद्ध पात्रेण प्रदत्तं भोजनं शक्तिवर्द्धकं न जायते न च तद्भोजनं शोभामाधत्ते। कलुषितचित्तानां माध्यमेन कापि शिक्षा किमपि साहित्यं वा कदापि न विकसति, तस्मादेव सत्यशुचितात्यातपोधनानामस्त्यावश्यकत्वं संस्कृतमहत्त्वसंवर्द्धनाय।

यद्यपि संस्कृतसाहित्यविकासाय केपि वार्द्धकेपि तन्मन्थनं सुगूढतया कर्तुं तत्परा विलोक्यन्ते विविधवक्तव्यान्यपि प्रस्तुवन्ति समुपकुर्वन्त्यपि नवसंस्कृतयुवकान् । संगणकप्रयोगेणापि संस्कृतं सेव्यते पत्रपत्रिकाप्रकाशनेनापि परञ्च द्रव्यशुल्कं दत्त्वा कियन्तः पत्रपत्रिकादिकं क्रीणन्ति कियन्तो लिखन्ति सर्वसाधारणजनानामुपकाराय। साम्प्रतं वेदपुराणकाव्यदर्शनादिवाङ्मयमध्येतुं धनिकविद्यार्थिनो न प्रवर्तन्ते प्रत्युत केचिदावश्यकतावशादेव न्यूनसंसाधनास्तत्र प्रवर्तन्ते। विश्वसमाजे भौतिकसुखसंसाधनप्रदायिका विद्या गृह्यमाणा विलोक्यते। व्यावसायिकी विद्यैवाद्याधीयमानास्ति।

कृषिशिक्षापेक्षया भौतिकविज्ञानं चिकित्साविज्ञानञ्चाधिकं पठ्यते यन्त्रविद्यावशी लोकोयम्। यत्र विविध रासायनिकयन्त्रनिर्माणकलां प्राप्तुं यतन्ते केचित् । हस्तकलापि प्रसरत्येव। संस्कृते नवीनवैज्ञानिकानुसन्धातारः समपेक्ष्यन्ते यत्र दैनिकवस्तुनिर्माणकलोदेतु लौहवस्तुवस्त्रनिर्माणकलापि गवेषणीया। आयुर्वेदचिकित्सा यद्यपि संस्कृतस्यैव तथापि तत्र सिद्धिप्राप्तौ भैषज्यं क्वचित् फलति । नवीनकोरोनारोगादिशमनौपयिकचिकित्सा गवेषणीया। वेदादिशास्त्राणाम्महत्त्वन्तु वर्तत एव। संस्कारग्राहकमात्मविकासकं संस्कृतमित्यत्र कस्यापि न वैमत्यम्मनागपि । यदि संस्कृताध्ययनं सर्वत्र प्रवर्तेत तदा तृष्णामायामोहान्धकारो नूनमेव समाप्येत परं युगगतिरियं विचित्रैवास्ते। यो हि युगगतिमनुधावति स एव सफलो दृश्यते। संस्कृतं परम्परागतं शास्त्रमेव यद्विना न लोकः प्रसीदति न च विकसति न च शान्तिमेतीति सत्यं परञ्च तादृशामृतज्ञानप्रदायकं संस्कृतं भारते नाद्यापि प्रतिष्ठास्पदम् इति कस्यापि सहृदयस्य कष्टमनेन जायत एव । प्राचीनज्ञानविज्ञानपरम्परावाहकं संस्कृतं किन्तु साम्प्रतं निजयुगीनविद्याः कला वा विजयन्तेतराम। प्रतिप्रान्तमत्र संस्कृत विश्वविद्यालया अकादम्यः केन्द्रीयसंस्कृत विश्वविद्यालया आदर्शमहाविद्यालया अन्ये चापि विद्यालयाः सन्त्येव, तत्रत्याध्येतारो हि प्राध्यापकाः धर्मगुरवो वा जायन्ते प्रायेण। आधुनिकप्राविधिकसूचनाविज्ञानांग्लभाषाशिक्षाभावे ते शासकीयसेवापदानि लब्धुं न क्षमन्ते। विधिशिक्षाप्यद्य वर्धते तत्रापि चांग्लभाषा नवीनसिद्धान्तकल्पना संस्कृतज्ञाय कठिनैव जायते। नव युगानुरूपं संस्कृतं जीविकाप्रदाने स्वसामर्थ्यं लभेतेति कामये ।

सन्देशकः -प्रो धर्मदत्तःचतुर्वेदी वैदिकगणः शब्दविद्यासंकायाध्यक्षः केन्द्रीयोच्च- तिब्बतीशिक्षासंस्थानम्, मानितविश्वविद्यालयः, सारनाथः वाराणसी।


## पाठकानां कृते सूचना

कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्

**Sanskrit samvad,**

**Current A/C No. 22490200000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# सम्पादकीयम्

अमरवाणीसमुपासकाः सुधियः!

सादरं नमस्काराः।

मान्याः! संस्कृतसंवादस्य अयमंको भवतां करकमलेषूपायनीक्रियमाणो वर्तते। संस्कृतसंवादपक्षतो भवद्भ्यः शुभकामान् प्रयच्छामि। जानन्ति एव भवन्तो यत् संस्कृतदिवसो गतपक्षे सोल्लासं सर्वत्र समायोजित इति विज्ञाय मनोमयूरो मे नृत्यति। देशे देशान्तरे संस्कृतकविसम्मेलनानि संगोष्ठ्यः संवादाः परिसंवादाश्च समायोजिताः, यैः संस्कृतं दिनानुदिनं वर्धत इति विज्ञायते। वस्तुतः संस्कृतस्य युगमिदमस्ति। किन्तु सर्वे संस्कृता एकीभूय यदा कार्यं निस्स्वार्थं करिष्यन्ति तदैव संस्कृतस्य सम्यक् विकासो भवितुमर्हति। दृश्यते बहुषु स्थलेषु यत् कार्यं तथा न भवति यथा करणीयम्। स्वार्थिनो धूर्ता एव महीयन्ते, साधवस्तु पीड्यमानाः सन्तिः। संस्कृतस्य सूर्योदय इदानीमपि घनाच्छन्नो वर्तत इति वक्तुं शक्यते। अस्य समुदयार्थं वासुदेवद्विवेदिसदृशा विद्वांसः अपेक्ष्यन्ते। येषां मनसि न पदलोलुपता न वा धनलोलुपता न च स्वार्थप्रूतिभावनाश्च भवेयुः। किन्तु कः कराले कलिकाले विलोक्यते। बहवो हि जनाः कपटपटवः संस्कृतप्रचारमार्गे बाधकायन्ते। येन सुरभारती विषीदति। अस्तु। न दिनं कस्यचिदपि सर्वदा भवति। निशावसाने सूर्योदयो जायत एवेति नात्र संशयो विधेयः।

सम्मान्याः!

वयं पश्यामो यदस्माकं देशे ग्लोबलसंस्कृतफोरमनाम्ना संस्था प्रकाशमागतास्ति यया संस्कृतस्य क्षेत्रे क्रान्तिरानीता विलोक्यते। आशासे यदियं संस्था नूनमेव एकस्मिन् दिवसे विश्वस्य श्रेष्ठा संस्था भूत्वा संस्कृतस्य कल्याणाय कार्यं करिष्यतीति। धन्या अस्य पदाधिकारिणो ये निरन्तरं संगोष्ठीसमायोजनं कुर्वन्ति। अहं संस्कृतपरिवारपक्षतः अस्याः संस्थायाः पदाधिकारिभ्यो वर्धापनवचांसि प्रेषयामि।

महनीयाः! भद्रजनाः! भगवतः श्रीकृष्णस्य जन्मोत्सवो जन्माष्टमीपर्व भारतीयानामस्माकं पावनं पर्व वर्तते। भगवता श्रीकृष्णेन पृथ्व्या दानवा मारिता आसन्। पर्यावरणस्य रक्षा च तेन कृतेति श्रूयते। अहं भगवन्तं प्रार्थये यद् भारतं सर्वथा परोपकारनिरतं रोगशोकमुक्तं भवत् देववाण्याः संवर्धनं कुर्यादिति।

अमरवाणी विजयताम्।

सम्पादिका

।। वेद वाणी ।।

'उरुष्याण्णो अभिशस्तेः सोम नि पाह्यंहसः ।
सखा सुशेव एधि नः ।।'

'Protect us, Soma, from calumny. Preserve us from sin; pleased with our service, be our friend.' (The Rig Veda 1.91.15)

'यस्य ते पूषन्सख्ये विपन्यवः क्रत्वा चित्सन्तोऽवसा
बुभुज्रिर इति क्रत्वा बुभुज्रिरे।
तामनु त्वा नवीयसीं नियुतं राय ईमहे।
अहेळमान उरुशंस सरी भव वाजेवाजे सरी भव।।'

O! Lord Pushan, the Nourisher,"the wise,with Your protection and in friendship with You, gain joy and all ends of life. Be being in accord with the most laudable wisdom of Yours, we seek infinite wealth and riches. May the Supreme Lord, praised by all, come to our defence in every battle with our enemies.' (The Rig Veda 1.138.3)

'इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।।

The Divinity is One. The sages call It by varied names like Indra,Mitra, Varuna, Agni and well-winged Garutman. (The Rig Veda 1.168.46)

'आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः।
देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ।।'

'Let noble and auspicious works and thoughts, that take us to a higher level in life, come to us from all sides.The gods, that do not obstruct our progress but protect us always, bless us with growth and development.' (The Rig Veda 1.89.1)

**संकलन : एस.वासुदेव रावः**

# संस्कृते स्वतन्त्रतायाः स्वरूपम्



प्रो.राधावल्लभः त्रिपाठी

रक्षाबन्धनपर्वणि प्रतिवर्षं संस्कृतमहोत्सवः समग्रेऽपि देशे समायोज्यते। यस्मिन् मासे पर्व इदं परापतति तस्मिन्नैव मासे प्रायशः स्वतन्त्रतादिवसोऽपि समायाति। एषमोऽमृतमहोत्सव आयोज्यते स्वतन्त्रतायाः। अमृतवाण्या उत्सवः स्वतन्त्रतायाश्च अमृतोत्सव एकस्मिन्नेव सप्ताहे युगपदस्मिभिरायोजित इति महदम्माकं सौभाग्यम्। अयं यः संयोगः घटितः यदेकस्मिन्नेव सप्ताहे स्वतन्त्रताया अमृतोत्सवं ततश्च संस्कृतोत्सवं वयमायोजितवन्तः - तत्र कः आशय इति विचारणीयम्। वास्तविकी स्वतन्त्रता कीदृशी भवेत्, सा स्वतन्त्रता अस्माकं देशेनाधिगता वा न वेति विचारः संस्कृतमतिभिः संस्कृतात्मभिरस्माभिः करणीय इति तत्राशयः। वास्तविकी स्वतन्त्रता तु नास्माभिरद्यावधि प्राप्ता। या स्वतन्त्रता प्राप्ता सा आङ्ग्लानां शासनान् मुक्तिमात्रम्। इयं स्वतन्त्रता यदा १९४८वर्षे भारतेन प्राप्ता तदा क्रान्तिकारी कविर्निर्भयः लिलेख स्वराज्यमागतं परं सुराजता तु नागता।

अयमाशयो यत् यत् स्वाराज्यं प्राप्तं तत् वास्तविकं स्वराज्यं नास्ति। इयं या स्वतन्त्रता सम्प्राप्ता सा तु वास्तविकी स्वतन्त्रता नास्तीति नः कवयः प्रज्ञावन्तो वा बुद्धिजीविनः समामनन्ति। तर्हि वास्तविकी स्वतन्त्रता कीदृशी भवेत् इति विचारः करणीयः। वास्तविकस्य स्वातन्त्रस्य स्वरूपं संस्कृतेनैव संस्कृतस्रोतोभिर्वा वस्तुतो सहजं ज्ञातुं शक्यते। इदमेव स्वारस्यं मन्तव्यं यत् स्वतन्त्रतादिवसमहोत्सवः स्वतन्त्रताया अमृतमहोत्सवो वा एकतः अपरतश्च संस्कृतमहोत्सवोऽस्माभिरायोज्यते अस्मिन् सप्ताहे अस्मिन् मासे च।

अथ संस्कृतसाहित्ये संस्कृतशास्त्रेषु स्वतन्त्रताया किं स्वरूपमिति विमृशामः।

व्याकरणशास्त्रपरम्परायां शब्द प्रकाशकः आरम्भकश्च मतः। इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्, यदि शब्दाह्वयं ज्योतिरासंसारान्न दीप्यते।। इति आचार्याः प्राहुः। शब्दाख्यं यज्ज्योतिः तेन निखिलं भुवनमादीपितम्। शब्दस्यैवालोके व्यवहाराः प्रतीयन्ते, प्रचलन्ति वा। एतेन पतञ्जवि-भर्तृहरिप्रभृतीनां प्राचामेतन्मतं यत् शब्दात्मनि ब्रह्मणि सर्वं विश्वं विश्रान्तम्। यदि शब्दो न भवति तर्हि विश्वं न भवति। ऋग्वेदे वागम्भृणीसूक्तं वर्तते। तत्र वाक् स्वयं वदति यन्निखिला सृष्टिर्मयैव विरच्यते। वागेव विश्वा भुवनानि जज्ञे-इति अन्यत्रापि ऋग्वेद उक्तम्। अस्य किं स्वारस्यम् क आशयः? यथा व्याकरणदर्शने आचार्याः प्राहुर्यत् शब्द केवलं प्रकाशकः स तु आरम्भकोऽपि वर्तते। शब्देन ज्ञानं भवति, ज्ञानस्य प्रकाशो जायते इति यथासत्यं तथैव शब्देन वाचा वा सृष्टेरारम्भोऽपि भवति इति ऋषीणां अस्माकं चिन्तकानां च आशयः। तर्हि कोऽसौ शब्दो केयं वा वाक् यया सृष्टिर्विधीयते इति प्रश्न उदैति। यान् शब्दान् वयं संस्कृतेमहोत्सवे स्वातन्त्रतादिवसमहोत्वसे वा वदामः यैर्वयंमालपामः तैस्तु न नवीनां सृष्टिर्भवेत्। तर्हि येन शब्देन यया वाचा नवीना सृष्टिर्भवेत् तस्य शब्दस्य तस्या वाचः स्वरूपं विचारणीयम्। ये शब्दा अस्माभिरुच्चार्यन्ते ते तु वाचः तुरीयं रूपं भवन्ति। तस्याः वाचः चत्वारि रूपाणि भवन्तीत्यपि वैदिका ऋषय आममन्ति। तद्योक्तम् ऋग्वेदे-

चत्वारि शृङ्गास्त्रयश्चास्य पादा-
स्तानि विदुर्ब्राहमणा ये मनीषिणः।
गुहा त्रीण्यिङ्गिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति।
इति।

तुरीयं यद् वाचो रूपं तन्मनुष्या वदन्ति, तस्या एतस्या वाचः चत्वारि शृङगाश्चत्वारि वा रूपाणि भवन्ति तेषु त्रीणि गुहायां निहितानि सन्ति। तानि तु न प्रत्यक्षं गोचरीकर्तुं शक्यन्ते। इति यद् महर्षीणां वैदिकमनीषिणां चिन्तनमभवत् तस्यैव प्रस्तारो विहितो वाक्यपदीयकारैः भगवद्भिर्भर्तृहरिभिः। तैस्तु पश्यन्ती मध्यमा वैखरी चेति त्रीणि स्थानानि वाचः प्रतिपादितानि। परा तु परमे पदे प्रतिष्ठिता। अत्यन्त्यं निगूढत्वात् पराया वर्णनं तैर्न कृतम्। परा वाक् प्रत्यक् चौतन्यरूपा। तत् तु चौतन्यं व्याकरणस्य विषयो नास्ति। व्याकरणं तु पश्यन्ती तदनु मध्यमां तदनु च विशेषो वैखरीं व्याप्नोति। परां यावद् वैयाकरणा न गच्छेयुः, ये तत्त्वदर्शिनो वा दार्शनिका वा सन्तीति ते परां परामशन्त्विति कृत्वा भर्तृहरिभिः साक्षाद् वर्णनं पराया न विहितम्। इयं च परा वाक् परात्परतत्त्वपरामर्शकैः परामृष्टा।

सोमानन्दोत्पलदेवाभिनवगुप्ताद्याः शैवशास्त्रस्य पारदृश्वान आचार्या परां वाचमेव प्रतिभामाहुः। सा च प्रतिभा स्वातन्त्र्यरूपिणी। शिवः शक्त्यायुक्तो विश्वमुन्मीलयति। आनन्देन लीलया वाऽसौ आत्मानमेव आत्मना रचयति। चौतन्यम्, आनन्दः, इच्छा, ज्ञानं क्रिया चेति पञ्च रूपाणि परावाग्रूपायाः प्रतिभाया अस्यां सृष्टिप्रक्रियायां भवन्ति। आनंदो हि नाम स्वातन्त्र्यम्। तंत्रालोकसारेभिनवगुप्त आह-स्वातन्त्र्यमानन्दशक्तिः। तन्त्रालोके चोक्तम्-

किन्तु दुर्घटकारित्वात् स्वाच्छन्द्यान्निर्मलादसौ।
स्वात्मप्रच्छादनक्रीडापण्डितः परमेश्वरः।।

किमिदं स्वाच्छद्यं नाम? निरङ्कुशत्वं तु स्वाच्छन्द्यं नास्ति। स्वैराचारस्तु स्वाच्छन्द्यं नास्ति। अभदेऽपि भेदावभासनम्, भेदावभासेऽपि चाभेद इति यत् परमेश्वरस्य स्वाभाविकं सामर्थ्यं पारमेश्वर्याख्यं तदेव तस्य स्वाच्छद्यं। मनुष्यस्यापि स्वाच्छन्द्यं वस्तुतस्तदेव। परा वागेव प्रत्यक् चौतन्यमेव तत् स्वाच्छनद्यवभासयति। ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्याम् अभिनवगुप्तपादा इदमेव स्वाच्छन्द्यस्वरूपं विवृण्वन्ति। पूर्णता एव स्वातन्त्र्यम्। अन्यनिरपेक्षः यः पारमार्थिक आनन्दः, स स्वातन्त्र्यरूपो भवति। तस्मिन् सर्वशक्तिमत्त्वं अपरिच्छिन्नप्रकाशत्वं च भवति। इदं स्वातन्त्र्यं तु मनुष्यमात्रस्य स्वभाव एव।

वेदान्ते यन्निर्गुणं ब्रह्म प्रोक्तं तदत्र शक्तिसमन्वितः शिवायते। तस्मिन् शिवे सृष्टिजननक्षमता शक्तिर्वा विलसति। सा च शक्तिः पञ्चकृत्येषु प्रतिफलति - सृष्टिः, स्थितिः, संहारः, विलयः अनुग्रहश्च। निराधारो निराकारो शून्यालयोऽपि शिवः सिसृक्षामात्मनि परावाग्रूपं प्रतिभारूपिणीं वा धारयति। इदमेव तस्य परमं स्वातन्त्र्यम्।

शिवः प्रकाशरूपः शक्तिः विमर्शरूपिणी। प्रकाशः सत्ताविषयकं ज्ञानविषयकं वा स्वातन्त्र्यम् , विमर्शः क्रियाविषयकं स्वातन्त्र्यम्। एताभ्यां प्रकाशविमर्शाभ्यां स्वातन्त्र्यारूपाभ्यां स्फुरत्ता वा स्पन्दो वा सृष्टेः प्रजायते।

तथाहि पराप्रवेशिकायाम् अभिनवगुप्तः -

इह खलु परमेश्वरः प्रकाशस्वभावः। प्रकाशश्च विमर्शस्वभावः। विमर्शो नाम विश्वाकारेण विश्वप्रकाशनेन विश्वसंहरणेन अकृत्रिमोऽहमिति स्फुरणम्।

तदत्र इत्थं भवति समीकरणम्

परा वाक् = प्रतिभा = स्वातन्त्र्यम्

स्वातन्त्र्यं नाम किम्? स्वात्मनि तन्त्रता स्वतन्त्रता स्वातन्त्र्यं वा। स्वात्मा तु परा वाक्। परायां वाचि प्रतिष्ठा वा मनुष्यस्य स्वस्वरूपे विश्रान्तिर्वा स्वातन्त्र्यम्। य आत्मनिष्ठो भवति स आत्मनि प्रभवति यद्यात्मनि प्रभवति तर्हि जगत्यपि स्वातन्त्रेण व्यवहर्तुं शक्नुयात्। यावत् परायां वाचि प्रतिष्ठानं न भवति, आत्मनि विश्रान्तिर्न भवति, तावत् वास्तविकी स्वतन्त्रता तु न लब्धुं शक्यते।

अथ स्वतन्त्रतायाः सन्ति नाना भेदाः - वैयक्तिकी स्वतन्त्रता, कौटुम्बिकी स्वतन्त्रता, सामाजिकी स्वतन्त्रता, आर्थिकी स्वतन्त्रता, राजनैतिकी स्वतन्त्रता, राष्ट्रिया स्वतन्त्रता चेत्यादयः। तेषां सर्वेषा मूलं तु परायां वाचि प्रत्यक्चौतन्ये वा नरस्य प्रतिष्ठा वर्तते, यदि मूलं नास्ति तर्हि या शाखा प्रताना वा प्रदश्र्यन्ते तानि सर्वाणि आभासरूपाण्येव। तानि वास्तविकीं स्वतन्त्रतां नैव निर्मापयन्ति। वास्तविक्या स्वन्त्रतायाः प्राप्तये तर्हि को नाम मार्गः? ये मार्गा आर्थिक्या स्वतन्त्रता प्राप्तये राजनैतिक्याः स्वतन्त्रताप्राप्तये वैयक्तिक्याः स्वतन्त्रता प्राप्तये भवन्ति, ते मया न प्रत्याख्यायन्ते, ते अभ्यसनीयाः, तेषां मार्गाणामाश्रयः ग्राह्यः किन्तु मूलं यत् स्तन्त्रताया वर्तते तद् रक्ष्यम्। तस्य मूलं वर्तते मनुष्यस्य आत्मस्वरूपविश्रान्तिः, परायां वा वाचि विश्रान्तिः। संस्कृतसाहित्यम्, अस्माकं शास्त्राणि च इदमेवोपदिशन्ति।

परात्परचौतन्यं एकम्, तदात्मानं विस्तरयति। इयमात्मविस्तृतिस्तस्य स्वातन्त्रता वर्तते। एवमेव कविरात्मानमुत्तमकाव्यरचनायां, चित्रकारः श्रेष्ठकलासृष्टौ आत्मानं विस्तारयति। एकत्वे अनुशासनं, विस्तारे शासनान्मुक्तिः। स्वतन्त्रतायाः इयमेव स्वारस्यं यदनुशासनं प्रथमं भवतु, तदनु आत्मविस्तृतिरूपा तस्मान्मुक्तिरपि भवतु। अनुशासनं यदा केवलं शासनं भवति, तदा तु परतन्त्रैव स्यात्। अत एव केवलं शासनं मा भूत, केवलं राज्यं वा मा भूत। तत्र स्वत्वं योजनीयम्। यदि स्वत्वं नास्ति तर्हि केवलं राज्यं भवति स्वराज्यं न भवति, यदि स्वत्वं नास्ति तर्हि केवलं तन्त्रं भवति, स्वातन्त्र्यं न भवति।

एकत्वं च विकल्पानामन्वेषणं च, अनुशासनं च शासनान्मुक्तिश्च इति कापि प्रक्रिया सर्वेषु शास्त्रेषु दृश्यते।

अस्माकं सर्वाणि शास्त्राणि स्वतन्त्रताया इदमेव दर्शनं प्रतिपादयन्ति, परिपोषयन्ति। व्याकरणशास्त्रं वा भवतु, अलङ्कारशास्त्रं वा, न्यायदर्शनं वा योगदर्शनं वा सर्वत्र स्वतन्त्रताया इयं व्यवस्था वर्तते। तेनैव शास्त्रानुशासनं शक्यं भवति। व्याकरणे उत्सर्गापवादव्यवस्था वर्तते। उत्सर्गः सामान्यो नियमः। अपवादः तं बाधते। उत्सर्गः व्याकरणस्य आत्मानुशासनम्, अपवादः तस्य बन्धनान्मुक्तिः। भगवता पाणिनिना चतुर्विधं बाहुलकं प्रत्यपादि। तस्मिंश्च भाषा स्वाराज्यं स्थापयति। अवमेव तिङन्तविधाने नामधातूनां व्यवस्था वर्तते। तत्र परा वाचो विकल्पाः आनन्त्यं गृहणन्ति। इदमानन्त्यं स्वतन्त्राया लक्षणम्। काव्यरचनायां इदं दृश्यमानं जगत् कार्यकारणसम्बन्धविनिर्मितं, तदेवाधारभूतम्, किन्तु कविप्रतिभा बहुलीभवने विकल्पानामनुसन्धित्सया तदतिक्रामति। तेन कविर्लोकयात्रया

नियतिकृतनियमरहितां विवशीकृतो न भवति, लोकयात्रां वशीकरोति। यथोक्तं राजशेखरेण कविवचनायत्ता च लोकयात्रा, सैव निःश्रेयसमूलम्।

यदि जनाः केवलं शासननिर्भरास्तर्हि वास्तविकं स्वातन्त्र्यं न भवति। जना आत्मानुशासनेन शासनं सञ्चालयेयुस्तदा वस्तुतः स्वतन्त्रता स्यात्। अद्यत्वे जनाः शासनमुखापेक्षिणः। कोटिकोटि निर्धना निःशुल्कान्नवितरणाय शासनमवलम्बन्ते। इयं तु घोरा परतन्त्रता। अपि नाम तथाकथितस्वातन्त्र्यकाले अधिकाधिकं परतन्त्रायते भारतीयजनतेति प्रश्नोऽत्र उदैति। यद् राज्यं यच्छासनं वा तस्या एवंविधां परमुखापेक्षितां पोषयति तस्यै आत्मनिर्भरताया आत्मानुशासनानुकूलताया अवसरान् न ददाति तच्छासनमपि पारतन्त्र्यमेव पोषयति।

एकोऽहं बहु स्याम् इत्युपनिषदुक्तेः बहुलतायां बहुलीभवने संस्कृतस्यस्वाधीनचेतना कचति विकसति। इयं चेतना भूमायां विश्राम्यति। भूमा हि नाम आनन्त्यम्। एकेन सङ्कोचेन वा सा नैव तुष्यति, प्रसारेण परितोषस्तस्या जायते। संस्कृतस्य सङ्कुचितीकरणं सम्प्रति क्रियते कैश्चिद् दाम्भिकैर्मिथ्या संस्कृताभिमानिभिः। यादृशं संस्कृतं वयं वदामः, तादृशं तदेव वा संस्कृत मानकं संस्कृतम्, अस्माभिः संस्कृतस्य मानकीरणं कृतम् एवमेवमेव केवलं वक्तव्यं संस्कृतम्-इति तेषामेतादृशैर्निर्देशैः संस्कृतस्य स्वाधीनचेतना विहन्यते। नाना रीतयः नाना शैल्यः संस्कृते विकसिताः, सरलसरला बालोचिता रीतिः सा भवतु नाम। प्रौढिप्रकर्षान्विता मनीषिणामपि रीतिर्भवतु, यत्र आनन्दो लसति मनुष्यस्य कल्पनासाम्राज्यं वितन्यते, भाषायाः सोऽपि महिमा विजृम्भताम्।

(केन्द्रियसंस्कृतविश्वविद्यालयजयपुरपरिसरेण समायोजिते संस्कृतोत्सवे प्रदत्तस्य उदघाटनभाषणस्य सम्पादितं रूपम्।)

।। श्रीः।।

# आधुनिकपद्यकाव्येषु युगबोधः



- डॉ. अरविन्दतिवारी
संस्कृतप्रवक्ता
आदर्शवैदिकवि0इ0का0
नंगला-सिनौली,बागपतम्, उत्तरप्रदेशः

वासुदेवसमारम्भामभिराजादिमध्यमाम्।
हेमचन्द्रादिपर्यन्तां वन्दे कविपरम्पराम्।
वक्तारः सुलभा देशे श्रोतारो दुर्लभास्तथा।
लेखकाः सुलभा लोके पाठका दुर्लभा यथा।
हृष्यत्सत्कविमण्डना स्थिरपदा क्रीडत्कपाटश्रया
काप्येषा विकसत्सुपद्यविषया गोष्ठी मुखोद्घाटनम्।
कर्तुं वाञ्छति सम्भ्रमेण रुचिराऽदृष्टा नवोढा चिरात्
सद्यो हे कवयोऽवगुण्ठनमहो चास्या हरन्त्वाननात्।।

संस्कृतसाहित्यमतीव विपुलं लोककल्याणकारि महनीयमस्ति। अस्य वैशिष्ट्यं सर्वैरपि सरागं गीतं वर्तते। वाक्यं रसात्मकं काव्यम्, रमणीयार्थप्रतिपादकः शब्दः काव्यम् इत्यादिपरिभाषाभिः काव्यं कविभिर्निरूपितं विलोक्यते। प्रायशो रूचीनां वैचित्र्यादृजुकुटिलनानापथजुषामितिधिया या हि परिभाषा यन्मनोहरति तस्य कृते सैव श्लाघ्या भवति।

काव्यं गद्यपद्यचम्पूभेदैस्त्रिधा प्रोक्तं वर्तते काव्यशास्त्रिभिरिति पश्यामः। गद्यं छन्दोहीनं पद्यं छन्दोमयं चम्पूः गद्यपद्यमयमिति। एषु त्रिष्वपि भेदेषु पद्यकाव्यमेव श्रेष्ठमिति मन्मतिः। गद्यं कवीनां निकषं वदन्तीति वाक्योपलब्धेरपि पद्यस्यैव काव्यत्वं विशेषतो मन्यते। अस्य कारणमपि वर्तते। पद्यं गद्यापेक्षया कठिनं भवति, विविधच्छन्दोभिः ग्रथितं पद्यं किमपि विशिष्टं स्थानं लभते। विश्वस्य वन्दनीयमादिमो वेदः छन्दोमय एव वर्तते। यो हि अमरकाव्यमिति कथ्यते। अतएवोक्तम्पश्य देवस्य काव्यं न ममार न जीर्यति।

वेदस्य प्रथमो मन्त्रः प्रमाणयति पद्यकाव्यस्य ज्येष्ठत्वम्। आकर्ण्यताम्
अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमम्।

वेदस्यैव गायत्रीमन्त्रो यो हि सर्वेषां जिह्वासु नृत्यति, कण्ठहारः सन्नसावपि छन्दसा रचितः पद्यकाव्यस्य श्रेष्ठतां दर्शयति। अनेन प्रकारेण सिद्ध्यति यत् पद्यकाव्यमेव काव्यस्य प्रथमुदाहरणासनं लभते। सामवेदस्तु पद्यकाव्यस्यैव किमपि रूपं दर्शयति यत्र अलौकिकः स्वरः श्रूयते। किमधिकं चतुर्ष्वपि वेदेषु यजुर्वेदं विहाय शेषास्त्रयोऽपि वेदाः छन्दोबहुलास्तस्मात्पद्यकाव्यबीजमेषु लब्धुं शक्यते।

कालान्तरे उपनिषत्स्वपि पद्यकाव्यमेव समुल्ललासेति वक्तुं न संशयलेशो मानसे। ईशावास्यमिदं सर्वं यत्किं च जगत्यां जगत् तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यचिद्धनम्। इत्यादयो मन्त्राः पद्यकाव्यस्यैव पल्लिवतं रूपं प्रकटीकुर्वन्ति। कालान्तरे पुराणानि यानि सर्वाण्यपि मनोहराणि छन्दोमयान्येव सन्ति, इमानि पद्यकाव्यस्यैव निदर्शनभूतानि सन्ति। एषु पुराणेष्वेव लौकिकच्छन्दांसि विलोक्यन्ते।

श्रीमद्भागवतं महापुराणं पश्यन्तु तत्र आदावेव शार्दूलविक्रीडितप्रयोगो दर्शयति अस्य पद्यकाव्यत्वम्। जन्माद्यस्य यत इति। निगमकल्पतरोर्गलितं फलम्। अस्मिन् विंशत्यधिकवृत्तानि प्रयुक्तानि विलोक्यन्ते। स्वल्पं गद्यं विलोक्यते पुराणे अस्मिन्। अतः काव्यन्तु पद्यमेव। कालान्तरे रामायणं यद्धि

मा निषाद प्रतिष्ठां त्वामगमः शाश्वतीः समाः।
क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।

इति प्रयोगः अपि पद्यकाव्यस्यैव काव्यत्वं दर्शयति। महाभारतं छन्दोमयमतएव पद्यकाव्यमेतत् यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् इति गर्जन् पद्यकाव्यस्यैव ज्येष्ठत्वं घोषयति। इयमेव परम्परा अग्रे वर्धमानावर्तत।

दर्शनकारिका अपि छन्दस्सु एव प्रायशो लभ्यन्ते। यथा सांख्यकारिका, वाक्यपदीयकारिका चेति। यानि प्रकरणानि तान्यपि आदौ मंगलाचरणत्वेन पद्यमेवाश्रयन्ति। यथा लघुसिद्धान्तकौमुद्यां

नत्वा सरस्वतीं देवीं शुद्धां गुण्यां करोम्यहम्।
पाणिनीयप्रवेशाय लघुसिद्धान्तकौमुदीम्।।
बालोऽपि यो न्यायनये प्रवेशमल्पेन वाञ्छत्यलसः श्रुतेन
सङ्क्षिप्य युक्त्यन्विततर्कभाषा वितन्यते तस्य कृते मयैषा।

अस्तु पद्यकाव्यस्य वैशिष्ट्यमनेनैव प्रतीयते यद् गद्यकारैरपि स्वग्रन्थारम्भे पद्येनैव मङ्गलाचरणं विधीयते इति साक्षात्पश्यन्तु महाकविर्बाणभट्टं रजोजुषे जन्मनि सत्त्ववृत्तये इति।

अत्र विंशतिपद्यानि विलोक्यन्ते। अतः काव्यन्तु पद्यमेव। एवमनुमीयते यद्देवाः पद्यकाव्येनैव तुष्यन्ति अतो मंगलाचरणानि पद्येनैव विरच्यन्ते।

महाकविं कालिदासं पश्यन्तु तेन रघुवंशम्, मेघदूतं कुमारसम्भवम् आदि ग्रन्थाः विरचिताः। सप्त ग्रन्थास्तेषु लभ्यन्ते तत्र सर्वत्र पद्यस्यैव बाहुल्याद् वक्तुं शक्यते यत् भवतां मानसे स्याद् यद् अभिज्ञानशाकुन्तलं नाटकं गद्यमयं तत्रापि पश्यन्तु पद्यवृष्टिरेव विहिता कालिदासेन आदौ या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री इति एकैश्वैर्यस्थितोऽपि प्रणतबहुफले वेदान्तेषु यमाहुरेकपुरुषमिति। पातुं न प्रथमं व्यवस्यति जलं। शुश्रूषस्व गुरून् कुरु, अर्थो हि कन्या। अनेन तु प्रतीयते यन्मनोहारि रूपं तत् पद्येन महाकविर्वर्णयति। इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम्। इदमेव दृष्ट्वा माघः शिशुपालवधमरचयत्, भारविः किरातार्जुनीयं श्रीहर्षः नैषधीयं महाकाव्यम्। एषु त्रिष्वपि महाकाव्येषु आरम्भः वंशस्थेन वर्तते। अनेन प्रतीयते यत् वंशस्थप्रिया हि महाकवयः। कालिदासादयस्तु उपजातिप्रियाः।

कालान्तरे सन्धानकाव्यान्यपि विलिखितानि यथा राघवयादवपाण्डवीयम्, सप्तसन्धानमिति जैनमुनेः। एतत्पद्यकाव्यस्यस्य संक्षिप्तं माहात्म्यमुक्तम्। अधुना अर्वाचीनपद्यकाव्यस्य युगबोधविषये प्रोच्यते।

परमसम्माननीयाः संस्कृतकाव्यसमीक्षकचणाः श्रद्धेयाः गुरुवर्या आचार्यरहसबिहारिद्विवेदिमहाशयाः विद्वांसः! वन्दनीयाः गुरुजनसम्मुखे वाणी नो निस्सरति मामकीनेति। परन्तु तेषामेव कृपया यत्किंचित् वदामि। पद्यकाव्यस्य इतिहासो विशालो वर्तते। अस्मद्गुरवः महामहोपाध्यायाः स्वयमेव विश्रुताः समीक्षका सन्ति, संस्कृतमहाकाव्यानां समालोचनात्मकमध्ययनं 1961-71 भवद्भिः त्रिपञ्चाशन्मितानां महाकाव्यानां समीक्षणं बहुपूर्वं कृतमस्ति, यस्य प्रकाशनं साहित्यविमर्शनाम्ना दिल्लीतो जातमस्ति। अधुनापि निरन्तरं समीक्षमाणा विलोक्यन्ते काव्यानि। अहमस्मि बालः, न मम ज्ञानं विस्तृतं गुरुजनसकाशाद् यदधीतं तदेवात्र वच्मि। सम्पूर्णमेते स्वव्याख्यानवसरे वदिष्यन्ति। कालान्तरे पद्यकाव्यं बहुधा विभक्तमस्ति। महाकाव्यं खण्डकाव्यं गीतिकाव्यं नीतिकाव्यम्, यात्रावृत्तकाव्यम्, दूरभाषकाव्यम्, सन्देशकाव्यम्, बालकाव्यम्, लोकलयाश्रितकाव्यम्। इति।

आधुनिकयुगे चलचित्रलयमाश्रित्यापि पद्यकाव्यानि विलिख्यमानि सन्ति। येन सुरभारतीयं प्रमोदते। यथा गलज्जलिका नेयमास्माकीना तथापि रोचते अस्मभ्यमिति मत्वा मथुरानाथभट्टप्रभृतयः प्रणम्याः विद्वांसः इमामाविष्कृतवन्तो वर्तन्ते यां श्रावं श्रावं मनो नृत्यति।

सज्जनाः! अर्वाचीनसंस्कृतपद्यकाव्येषु युगबोधः इति विषयमाश्रित्य वक्तुकामेन मया अभिराजराजेन्द्रमिश्रमहोदयाः सविनयं पृष्टाः। यद् हे गुरुवर्याः! कियन्ति महाकाव्यानि आधुनिकानि सन्ति इति। तैरुक्तं प्रियवर! त्रिशताधिकानि महाकाव्यानि संस्कृते प्रणीतानि सन्ति साम्प्रतम्। किन्तु महाकाव्येषु युगबोधस्तथाविधो नास्ति यथा स्वतन्त्रकवितासु वर्तते। महाकाव्यकथाकाल्पनिकत्वादिति। युगबोधः अर्थात् युगस्य बोधः। काव्ये युगं दृश्यते न वेति। सम्प्रति सर्वत्र युगबोधस्वर एव मुखरो दृश्यते। समाजे छलं विवादः परिनिन्दा परवस्तुहरणं सुजनपीडनं दुर्जनस्तवनं दुराचारिसाम्राज्यं प्रजावंचनं नेतृजल्पनमित्येतत् सर्वमपि प्रचुररूपेण लभ्यमानमस्ति। येन विदग्धः कविर्युगबोध ग्रन्थनन् वर्तते। यस्य काव्ये युगबोधो नास्ति नासौ महीयते।

युगबोधमेव दर्शयन् महामहोपाध्यायो रेवाप्रसादद्विवेदी स्वातन्त्र्यसम्भवं विशालकायं महाकाव्यमरचयत्, यद्धि स्वतन्त्रभारतस्य सर्वविपुलं वर्तते। एतन्महाकाव्यं राजतरंगिणीवत् वर्तत इति वक्तुं न संशयो मन्यताम्। महाकविरभिराजराजेन्द्रमिश्रः संस्कृतस्य सर्वविधासु विख्यातो गुरुवरो जानकीजीवनं वामनावतरणं महाकाव्यं विलिख्य महतीं ख्यातिमलभतेति। अभिराजराजेन्द्रगुरुवर्याणां मत्तवारिणी विद्धशालभंजिका, हविर्धानी इति गलज्जलिकाव्यानि सुप्रसिद्धानि सन्ति। यानि पाठं पाठं यतश्चोरयन्तश्चौराः आधुनिका अनेके विरचयन्ति। एतेषां काव्येषु युगबोधः सर्वथा विलोक्यते। यथा पद्यमेकं श्रूयताम्

न तथा कृपा गुरूणां न तथा कृपा प्रभूणाम्।
मयि सन्ततं यथाभूद् बृहती कृपा रिपूणाम्।।
अट्टालिकासु दृष्ट्वा रुदती मया समृद्धिः
क्रीडन् हसन् विलासो दृष्टस्तले तरूणाम्।। मत्तवारणी पृ0 82

अस्य महाकवेः काव्येषु यादृशो युगबोधो वर्तते तदन्यत्र दुर्लभ एवास्ति। पुनरयं लिखति यत्

व्यथा येन भुक्ता दृगस्रं निपीतम्।
सुखेनैव तज्जीवनं हन्त वीतम्।
न येनार्जितं पादपद्मं खलानां
यशश्चारणैस्तस्य लोके प्रगीतम्।। शालभंजिका पृ0 18

पद्मश्रिया समलंकृतस्य महाकवेरभिराजराजेन्द्रमिश्रस्य पद्यकाव्येषु यथा विस्मयलहरीति न्यायालयगीतम् इत्यत्र जीवन् युगबोधो नृत्यति।

संस्कृतजगतः सुविख्यातकवेः जानकीवल्लभशास्त्रिणः काव्येषु मनोहरो युगबोधो लभ्यते। काकली नाम्नी रचनास्य कवीनां नवकण्ठहारो वर्तते।

सम्प्रति प्रो0 जनार्दनप्रसादपाण्डेयो मणिः, डॉ. रामविनयसिंहः, राजेन्द्रत्रिपाठी रसराजः राजकुमारमिश्रः, बलरामशुक्लश्चान्ये गलज्जलिकासु निदर्शनभूताः सन्ति।

विश्रुतः कविर्निरंजनमिश्रो गंगापुत्रावदानं ग्रन्थिबन्धनं महाकाव्ययुगलं केदारघाटीविधवा बभूव, प्रमत्तगीतमित्यनेकानि खण्डकाव्यानि गीतिकाव्यानि विलिख्य पद्यकाव्यस्य श्रियं वर्धयन् वर्तते। अयं महाकविरस्ति निरंजनो मिश्रो गंगापुत्रावदानमहाकाव्ये दर्शयति युगबोधम्।

न्यायालयं पंकमयं तडागं प्राप्नोति यो न्यायजलाभिलाषी।
स शुष्ककण्ठो विनिमज्य पंके स्वजीवनं चापि जहाति दीनः।। 19/68
ग्रन्थिबन्धनमहाकाव्यस्य रम्यं पद्यमवलोकयन्तु।
तोरणे विद्युतो वल्ली स्वागतं लिखति स्वयम्।
मन्ये तपोवनप्रीत्या प्रकृतिस्तत्र नृत्यति।। 14/13
लघुविस्फोटकानां च नादैरागुंजितं नभः।
मन्ये स्वागतवेलायां शंखं दध्मौ दिगंगना। 19

आधुनिकखण्डकाव्यानां संख्या मन्ये सहस्राधिकमेवास्ति। एकस्य नवकवेः परिवर्तनम् इति काव्यमतीव चारु मया व्यलोकि। असौ कविर्हेमचन्द्रो बेलवालो वर्तते। सत्यमेवोक्तं युवकविना

कः कन्न पीडयति कश्च न पीडितोऽस्ति
पीडाऽधुनास्ति विविधा जनजीवनस्य।
दुःखे सुखेऽनवरतं खलु सा परं वै
सर्वोऽस्ति पीडित इह प्रतिवेशिसौख्यैः।। 48

स्वतन्त्रकवितासु युगबोधः प्रचुरो वर्तते। किन्तु समयाभावात् स्वल्पमेवोदाहरामि। सुकवेः परमानन्दझामहोदयस्य काश्मीरकलिके कवितां पाठं पाठं युगबोधस्य साक्षात्कारं कर्तुं शक्नोति कश्चिदिति। यथा

हे काशमीरकलिके सखि वर्धसे त्वं
दिष्ट्या मुहुः समवलोकितसुप्रभाता।
दूरं गताद्य दयिते तव कालरात्रिः
मोदस्व नृत्य ह साम्प्रतमुल्लस त्वम्।।
संस्कृतप्रतिभा 2019 अक्टू-दिसं 14

यात्राकाव्येषु अस्माकं गुरुवर्याणाम् अद्यापि नाम्नी रचना जगति विश्रुता वर्तते। यत्र वसन्ततिलकाच्छन्दसि सम्पूर्णमपि जीवनयात्रावृत्तमेनेन व्यलेखि मनोहारीति। यात्राकाव्याविधायाः इदमनुत्तमं निदर्शनमस्ति। आजीवनं संस्कृतप्रचाराय परिभ्रमन् आचार्यो वासुदेवो द्विवेदी गुरुवरो यदनुभूतवान् तदस्मिन् भोज्यरसब्याजेन तेन भगवता विलिखितम्।

तन्दूरिका विरचिता परिपक्वरोटी
माषस्य सूपमथ गाढतरं प्रशस्तम्।
छोला च हृद्यमिति पंचनदप्रदेश्यम्
अद्यापि भोजनमिदं सततं स्मरामि।। पृ0 245

प्रो0 हरिदत्तशर्मा प्रयागस्थो विद्वान् वैदेशिकं पद्यकाव्यं मनोहरमरचयत्। अनेनैव प्रकारेण श्रीमता प्रेमशंकरशर्म्मणा दिनत्रयं नामकं संस्मरणकाव्यं रचितमस्ति।

पद्ययुगस्य कालः बहुसुन्दरो वर्तते, सुकविः कृपारामत्रिपाठी, आशुकविः महावीरसारस्वतः, महाकविः प्रणवः, धर्मदत्तचतुर्वेदी, नवलता वर्मा, राजमतपुराणरचयिता सुधाकराचार्यः, महामहोपाध्यायः प्रो0 रहसबिहारी द्विवेदी, ओमप्रकाशपाण्डेयः, विन्ध्येश्वरीप्रसादश्रिः, प्रभुनाथद्विवेदी, कमलापाण्डेया, उमारानीपाण्डेया, मनुदेवभटट्टाचार्यः, राधावल्लभत्रिपाठी, रमाकान्तशुक्लः, रमाकान्तपाण्डेयः, सतीशकपूरः, मधुसूदनपेन्ना, महाराजादीनपाण्डेयः, शशिकान्ततिवारी, ऋषिराजपाठकः, शंकरराजारमणः संजयचौबे, युवराजभट्टराई चेति अनेके पद्यकाव्यानि विलिखितवन्तः सन्ति। पद्यकाव्यस्य या विधा विलुप्तमेवासीत् साधुना दक्षिणे भारते पुनरुत्थिता समग्रभारतस्य यात्रां कुर्वती विलोक्यते। सा विधास्ति चित्रकाव्यानाम्। डॉ. रामकृष्णपेजेत्तायः, डॉ. सुदर्शनचिपलुणकरः अपरे चेति इमां चित्रकाव्यविधां पुष्णन्तो वर्तन्त इति मोदास्पदमस्ति वृत्तम्।

बालकाव्यस्य आदिकवयः आचार्यवासुदेवद्विवेदिशास्त्रिणः सन्ति येषां गीतेषु युगबोधः साक्षाद् विलसति। ग्रामीणजीवनस्य वर्णनं कुर्वद्भिराचार्यैर्लिखितं यत्

भारतग्रामवासिनो लोकाः
अशनं स्वल्पं मलिनं वसनं
शुष्कं वदनं कथयति दुःखम्
ह्रस्वकुटीरं भग्ना खट्वा
वक्रपट्टिका रोदिति कन्या
करे तमाखुः कलहो गेहे
चिन्ता हृदये कृशता देहे।।

अपरे च सम्प्रदानन्दमिश्रः, संजयचौबे, राजकुमारमिश्रः, देवीसहायपाण्डेयः, युवराजश्चान्ये बहवः वर्तन्ते, येषां पद्यमयी बालरचना द्रष्टव्या नूनमेवास्ति।

पद्यकाव्यस्य एकमपरमपि रूपमाविष्कृतमस्ति सुकविभिः। फेबुकादिषु स्थलेषु प्रासंगिकं विषयमाश्रित्य धारावाहिककाव्यप्रणयनं प्रश्नोत्तरशैल्या सम्प्रति चलकविसमवायत्वं साधयति। अतः मया चलकाव्यमपि रचितमस्ति। यत्र चलकविसमायो विलोक्यते। इदानीमपि सुरेन्द्रमिश्रः, मोनोतोषः, लक्ष्मीनारायणपाण्डेयः, शास्त्रकविः प्रमोदशर्मा, शैलेशकुमारतिवारी वनमालिविश्वालादयो बहवः कवयः पद्यानि मनोहराणि विलिख्य सचेतसां मनांसि हरन्ति।

साहित्य-अकादमीतः गीतगंगागोमुखम् इति संकलनं प्रकाशितमस्ति, यस्य सम्पादकः महाकविरभिराजराजेन्द्रमिश्रगुरुवर्यो वर्तते। अत्र युगबोधस्य निदर्शनं कर्तुं शक्यते।

किमधिकं वदेयम्। मया स्वयमेव पद्यकाव्यस्य श्रीवृद्ध्यै काव्यामृतवर्षिणी षाण्मासिकी पत्रिका प्रकाश्यमाना वर्तते। यत्र प्रत्यंकं भवति छन्दोविशेषांकभूतम्। अधुना भुजंगप्रयातविशेषांकः प्रकाश्यमानः अस्ति। अस्य मुख्यमुद्देश्यमस्ति। महाकवीनां छन्दसां रक्षणमेव। श्रूयते वैदेकिशच्छन्दःप्रिया हि केचन हायकूसीजोतानकादिनां भारते प्रवेशं कारयन्तः सन्ति। इदमपि पद्यकाव्यमेव। किन्तु पद्याभासमात्रं नादर्तव्यमिति वच्मि। भारतीयच्छन्दामस्ति दारिद्रयं किम्? नास्ति। अतः अनुष्टुबुपजातिवसन्ततिलकावंशस्थशार्दूलशिखरिणमालिन्यादि वृत्तप्रियाणामस्माकं न मनस्तत्र निमिषमात्रमपि सन्तिष्ठते। अमृतभोजनप्रियाणां कृशरान्नं क्व रोचते।

अस्तु एतद् वक्तुं शक्यते यत् आधुनिकं युगं संस्कृतपद्यकाव्यस्य दर्शनीयमस्ति।

अमरवाणी विजयताम्

ओ३म्
भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण
(द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)
सत्य के प्रचारार्थ
सत्यार्थ प्रकाश
सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36-16 | मुद्रित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36-16 | मुद्रित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30-8 | मुद्रित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन
कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति सत्यार्थ प्रकाश के प्रचार प्रसार में सहभागी बनें
आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. 011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# नित्यं स्मरामि रमते नहि मे मनोऽत्र



-डा.प्रमोदकुमारशर्मा (शास्त्रकविः)
एसोसिएट प्रोफेसरः,
संस्कृतम्मेवम्प्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरूविश्वविद्यालये नवदेहली।

ज्ञानप्रियोद्धव ! वद प्रियमित्र ! रम्यं
यस्माद्विनाद् व्रजमहं सुखदं विशालम्।
त्यक्त्वागतोऽस्मि मथुरां तत एव राधां
नित्यं स्मरामि रमते नहि मे मनोऽत्र॥१॥
सा मे सखी प्रियतमा ललिता न जाने
गावो मनोहरलताः रसिकाः मयूराः।
नेष्यन्ति केन विधिना दिवसान् विना मां
मोक्षप्रियोद्धव ! वद क्रियताम्मया किम्॥२॥
लालित्यपूर्णकमनीयकलाविशेषा
सा कन्दुकेन यमुनातटबालुकायाम्।
क्रीडा कृतोद्धव ! मया सह गोपवृन्दैः
संस्मर्यते मुहुरहो हृदयेन सम्यक्॥३॥
वृन्दावने विषधरोऽमरकालियाख्यः
कालीह्रदस्य वसतिस्म जले विशालः।
तत्सर्पकालियभयङ्करमर्दनाख्यां
लीलां स्मरामि यमुनाजलवर्तिनीं ताम्॥४॥
गीतप्रगीतमधुरोत्तमरागकण्ठा
वाद्यप्रवीणमतितालसुताललीना।
लावण्यमोहकशशिच्छविरिन्दुलेखा
नाद्यापि विस्मृतिपथम्मम सा प्रयाति॥ ५॥
नृत्ये ह्यतीवकुशलां नवनीतरूपां
सद्यःप्रभूतनवनीतकरां विशाखाम्।
अद्वैततत्त्वरमणोत्सुक ! मानिनीनां
श्रेष्ठाम्प्रियोद्धव ! सखीमपि तां स्मरामि ॥६॥
चित्राञ्च चम्पकलताम्प्रियरङ्गदेवीं
सौन्दर्यचारुमहनीयकतुङ्गविद्याम्।
रक्ताम्बुजारुणशरीरलतां सुदेवीं
लालित्यपूर्णललनां ललितां स्मरामि॥७॥
गोमूत्रगोचरणगोमयलिप्तपूतां
धन्यां कदम्बतरुशीतलवायुरम्याम्।
भूमिं व्रजस्य यमुनाजलपोषितां तां
सर्वा स्मरामि मनसोद्धव! शोभमानाम्॥८॥
नीलाभकृष्णमुखपङ्कजनिर्गतास्ताः
श्रुत्वा व्रजस्य सरसप्रियरागवार्ताः।
ज्ञानी युवा च परिपक्वविरागशून्यः
सम्मोहितोऽभवदतीव सखोद्धवस्सः॥ ९॥
किञ्चित्क्षणावधिककालमतीत्य कृष्णं
वृन्दावनस्मरणमग्ननिमीलिताक्षम्।
प्रोवाच बुद्धिनयनेन निरीक्ष्य सर्व
त्यक्त्वा व्रजम्भज निराकृतिनिर्गुणं तद्॥१०॥
नैतज्जगन्न जगतस्स्मरणीयशोभा
नाप्यन्यवस्तु जगति स्थिरताम्प्रयाति।
कट्वम्लतिक्तमधुरा लवणाः कषायाः
सांसारिकास्तु विषयाःक्षणिका भवन्ति॥११॥
पुत्रो विवाहितसुता कमनीयकान्ता
भ्राता च बान्धवजना अनुजा वरिष्ठाः।
माता पिता च भगिनी रिपवस्सखायः
बन्धा इमे न जगतोऽमरताम्प्रयान्ति॥१२॥
गावो व्रजस्त्रिय इमा यमुनातटं वा
गोपालनञ्च मरणं बहुराक्षसानाम्।
नृत्यादिचञ्चलमनोहरबाललीलां
सर्वा व्रजस्य घटनास्त्यज वासुदेव॥ १३॥
व्यर्थं व्रजस्य तव संस्मरणं व्रजेश !
हे गोकुलेन्द्र ! भव निर्मलमानसस्त्वम्।
त्वं सच्चिदात्मनि सखे ! कुरु मानसं स्वं
ह्यद्वैततत्त्वमधिगम्य सुखम्प्रयाहि॥१४॥
शास्त्रीयवैदिकसनातनधर्मदीनाः
मूढाश्च सत्पठनपाठनकर्महीनाः।
शिक्षां विना भरणपोषणकार्यमग्नाः
ग्राम्या जना अभिजने मलिनो भवन्ति॥१५॥
ग्रामीणगोपवनितापटचोरणं तद्
किंवा सखे ! प्रतिदिनन्नवनीतचौर्यम्।
ह्येतत् समस्तचरितं तव निन्दनीयं
तस्माद् व्रजं तु किल विस्मर वासुदेव!॥१६॥
तस्य प्रियोद्धवसखस्य विवेकिनस्तु
वैराग्यपूर्णहितकारिमनोवचांसि।
श्रीकृष्णचन्द्रभगवाञ्छ्रुतवान् सहर्षं
श्रुत्वेदमाह यदुनन्दनकृष्णचन्द्रः॥१७॥
नित्यं स्मरन्ति सततं व्रजवासिनो मां
सर्वेऽपि ते मनसि मे विहरन्ति नित्यम्।
क्रीडास्थलञ्च यमुनातटवर्तिरम्यं
गोपालगोकुलगवां हृदयान्न याति॥१८॥
तेषां स्मृतौ प्रियसखोद्धव ! या विना तान्
जाता परिस्थितिरियम्मम निश्चयेन।
स्यात् सैव गोकुलनिवासिसमस्तयूनां
तेषाम्प्रियोऽस्मि मम तेऽपि च सन्त्यवश्यम्॥१९॥
स्यान्मूर्छिता करुणया मम संवियोगात्
नूनं समग्रसखिमण्डलचेतनापि।
प्रेम्णा प्रियेषु हि परस्परविप्रयोगे
सैषा दशा भवति चोद्धव ! रागयोगात्॥२०॥
गावो लताश्च हरिताश्च कदम्बवृक्षाः
ते मे प्रियाः कुशलिनो व्रजवासिनःकिम् ?
वार्ता न वेद्मि कुशलां व्रजवासिनीनां
राधामनोरमसखीललितादिकानाम्॥ २१॥
आसामहो सुखदसुन्दरमानिनीनां
वृत्तान्तमाशु सुखदं च कथं लभेयम्।
ज्ञानी भवान् प्रियसखो वद मामुपायं
चेखिद्यते मम मनो करवाणि किं तत् ? ॥२२॥
स्वाभाविकम्मनसिजं व्रजवासिनीभ्यः
स्नेहम्मदीयमपरम्प्रियगोपिकाभ्यः।
गोप्यम्प्रियोद्धव ! सखे ! हृदयं विना त्वाम्
कोऽन्यो वदिष्यति निजं व्रजकन्यकास्ताः॥२३॥
गोगोपसेवितमतीव सुरम्यदेशं
गोदुग्धगोघृतसुवासितमद्वजन्तम्।
गोधूलिभूषितसुगन्धितपुष्पयुक्तं
शीघ्रम्प्रयाहि यमुनातटवर्तिनन्त्वम्॥२४॥
त्वं वेदशास्त्रविधिसम्मतगूढतत्त्वं
जानासि तद्बलमलम्ममतादिशून्यः।
तासाम्मनोरमसखीजननायिकानां
मोहादिदोषरहितं कुरु मानसं त्वम्॥२५॥
ब्रह्मस्वरूपमखिलागमसारभूतं
वेदान्तसारपरिवर्णितमद्वितीयम्।
मोहान्धकारमयगर्तनिमज्जितास्ताः
गत्वा प्रबोधय सखे ! व्रजवासिबालाः॥२६॥
प्राप्स्यन्ति हास्यविगतास्सह राधया त्वां
मच्चित्रचिन्तनरता व्रजबालिकास्ताः।
गत्वा हि तत्र भवतातिविनम्रभावात्
सन्देशपत्रमिदकं मम चार्पणीयम्॥२७॥
पार्श्वागतासु सकलासु च तासु सद्यो
बालासु तत्र भवता मम हार्दभावम्।
पत्रस्थितं विलिखितं ननु सम्प्रपठ्य
सुश्रावणीयवचसा हि निवेदनीयम्॥२८॥
इत्येवमुद्धवसखं व्रजनन्दनोऽसौ
श्रीकृष्णचन्द्रभगवानुपदिश्य दृश्यम् ।
मार्गं व्रजस्य परिपूततमस्य तस्य
सम्प्रेषयन् हरिरतीव सुखी बभूव॥२९॥
गच्छन् व्रजं पथि सखा यदुनन्दनस्य
शोभां विलोक्य नवकोमलवल्लरीणाम्।
छायाञ्च शीतलकदम्बकपादपानां
सम्प्राप्य मुग्धहृदयश्चकितो बभूव॥३०॥
नैसर्गिकञ्जलमहो यमुनास्थितं तत्
स्वच्छं स्वभावमधुरञ्च निपीय मार्गे।
मन्दं सुगन्धभरितं सुखदं समीरं
कामं स्पृशन् व्रजमयं ललितम्प्रयाति। ३१॥
तत्र प्रयाणसमये व्रजबालिकानां
तासाम्प्रियस्य वहुधा व्रजबल्लभस्य।
कृत्वा मुहुर्मुहुरहो स्मरणं तयोस्तु
रूपं विभाव्य च निजात्मनि विस्मृतोऽभूत्॥३२॥
गोवत्सगोपवनितामुखजन्यशब्दान्
श्रुत्वा प्रियं कलरवञ्च नवं खगानाम्।
प्रत्यागता नयनयोर्नवचेतना सा
तस्योद्धवस्य हृदये च विशालबुद्धेः॥३३॥

# कविताद्वयी

-अरविन्दतिवारी
सम्पादकः
काव्यामृतवर्षिणी

(१)
राष्ट्रं महनीयं तत्
राष्ट्रं महनीयं तत्
यस्मिन् देशे वीरपुंगवा जनिं लेभिरेऽसंख्याः
रामकृष्णगंगाधरराणालक्ष्मीराज्ञीमुख्याः॥
गानं गायति कविवरलोको नितरां यस्य निकामं
राष्ट्रं महनीयं तत् २
सेनानीमंगलपाण्डेयः भारतमातुर्धीरः।
रणनादं कृतवान् सर्वादौ मेरठनगरे वीरः।
यस्य श्रुत्वा आंग्लसैनिका भीता हुहुंकारं
राष्ट्रं महनीयं तत् २
चन्द्रशेखरो युवा स्वदेशे नांग्लानामधिकारं
द्रष्टुं कामयते पलमेकं कुर्वन् नो जयकारं
सिंहादस्माद्भीतं तन्त्रं चांग्लानां बहुवारं
राष्ट्रं महनीयं तत्२
संसदि युवा भगतनामासौ श्रावयितुं विस्फोटं
आंग्लानां गर्वं नाशयितुं हृतवान् तेषां टोपम्
भारतमातुर्निगडं हर्तुं कृतवान् बहु प्रहारम्
राष्ट्रं महनीयं तत्२
वीरसुभाषः स्वातन्त्र्यार्थं युद्धं कर्तुं हृष्टः
नत्वा दुर्गां रणचण्डीं सज्जः तिष्ठति स्म पुष्टः
यस्माद् भीता आंग्लशासकाः नाकुर्वन्फुत्कारं
राष्ट्रं महनीयं तत्२
(२)
संस्कृतसप्ताहोऽयम् २
विलसति भारतदेशे भव्या मधुरा संस्कृतभाषा
मानवताया जननीभूता नितरामद्भुतनासा
यस्यां राजति दिव्यं ज्ञानं तस्याः कृते महोऽयं
संस्कृतसप्ताहोऽयम् २
विहरति ललितपदा साम्राज्ञी भाषाणां संसारे
हरति सतां चेतांसि यासौ कवितानां कासारे
जनयति भावं भव्यं नव्यं तस्यै सम्मानोऽयं
संस्कृतसप्ताहोऽयम् २
कवयः काव्यकलाभिः सेवन्ते यां रुचिरां मान्यां
चित्रयन्ति महनीयाश्चित्रैः कमनीयां कवितायाम्।
सद्गतिदात्री या लोकेऽस्मिन् तस्या बहुमानोऽयं
संस्कृतसप्ताहोऽयम् ३
ग्राम्यो बालो यां सेवित्वा रचयति भावविलासं
गोष्ठ्यां सम्मानं लभमानस्तनुते मुकुलितहासं
नीतिगीतिसद्भावमयी या तस्यां संसक्तोऽयं
संस्कृतसप्ताहोऽयं ४
संस्कृतसंस्थानं धन्यं यत् नितरां कविकुलवन्द्यम्
आकारयति कवीन् काले श्रावयितुं सरसं काव्यं
प्रसरतु यशोवितानं भुवने कामयते दिवसो+यं
संस्कृतसप्ताहोऽयम्॥ ५

# श्रीकृष्णाष्टकम्

-आनन्द शास्त्री

देवकीनन्दनो वासुदेवोऽच्युतः
गोकुले पालितो लालितो गोकुले।
धन्यदेशोऽपि सो वोवतार इह
यत्र लीला कृता चाथ गीता कृता ॥
नन्दजस्यापि लोकत्रयं मृन्मुखे
वेक्ष्य माता यशोदाभवन्मूर्च्छिता ।
लीलया तेजसा गोपबालस्य हि
देवताश्च स्मयन्ते सिमे खे स्थिताः ॥
पूतना मारिता चौव वत्सासुरः
हे हरे वै बकाघासुरौ तारितौ।
दर्पिता कंसदर्पस्त्वया हे विधे
ह्लादिताश्चौव भक्ता मुकुन्द स्वभूः॥
द्रौपदी रक्षिता पाण्डवा रक्षिताः
चेन्द्रदेवाच्च गोपालकास्ते तथा॥
संस्कृतिः रक्षिता संस्कृतं वर्धितं
संस्कृतिं संस्कृतं रक्ष लोके पुनः॥
गोपिका गोपका ह्लादिता हे प्रजा
औवामदेवोऽप्यसौ चोत्सुको धूर्जटिः।
चागता सा यशोदा गृहाद्वै बहिः
लोकिता लोकते गोपबालं तथा॥
तेजसा चेतसा सुन्दरं नन्दजं
केशवं श्रीधरं देवकीनन्दनम्।
सत्यभामापतिं कंसविध्वंसिनं
गोपिकावल्लभं सर्वदाहं भजे ॥
कैटभारिं रटामीह सेवे खलु
नौमि जाने च मन्दे च वन्दे हरिम्।
शाठये चिन्तये च शृणोम्यच्युतं
स्तौमि चेक्षे सचे सर्वदा सर्वदा ॥
चक्रिणं शङ्खिनं नौमि योगेश्वरं
शाश्वतं निर्विकारं सकारं सदा ।
मायया कल्पितं बालरूपं तथा
हे हरे हे हरे पातु मां सर्वदा ॥
इदं कृष्णाष्टकं पुण्यं यः पठेत्कृष्णसन्निधौ।
कृष्णलोकमवाप्नोति कृष्णेन सह मोदते ॥

## प्रधानमन्त्रिणः संसदीयक्षेत्रे मुख्यमन्त्रिणः योगिनः पर्यटनस्य क्षेत्राय नूतनोपहारः

वाराणसी। प्रधानमन्त्रिणः संसदीयक्षेत्रं वाराणसीं पर्यटनस्य क्षेत्रे प्रतिदिनं कीर्तिमानं निर्मीयते । मुख्यमन्त्रिणा योगिना आदित्यनाथेन काश्याः गङ्गायां सञ्चालितस्य क्रूजयानस्य क्षेत्रविस्तारः कृतः। अधुना एतत् क्रूजयानं काशीतः मिर्जापुरपर्यन्तं गमिष्यति। पर्यटकान् चुनारकिलाम् अपि दर्शिष्यति अपि च शूलटङ्केश्वरमहादेवमन्दिरस्य दर्शनम् अपि कारयिष्यति। साक्षात् सङ्गीतप्रसारणेन वाराणस्याः भोज्यपदार्थेन सह गङ्गायाः लहरीषु क्रूजयानस्य आनन्दं नेतुं शक्यते। क्रूजयाने विवाहः, सत्सङ्गः, सम्मेलनं चापि कर्तुं



शक्यते।

गङ्गायाः लहरीषु अधुना शीघ्रावागमनस्य यात्रीनौकया, सैममाणिकशाहक्रूजयानेन च पर्यटकान् काशीतः मिर्जापुरपर्यन्तं यात्रा कारयिष्यते। साकमेव शूलटङ्केश्वरमन्दिरे अपि दर्शनं कारयिष्यते । सितम्बरमासारभ्य आरभ्यमानं क्रूजयानं वाराणस्याः रविदासघट्टे प्रातः नववादने चलिष्यति अपि च प्रायः सार्धैकहोराः प्राचीनशूलटङ्केश्वरमहादेवमन्दिरं प्राप्स्यति। गङ्गातटे स्थापिते शूलटङ्केश्वरमहादेवमन्दिरे दर्शनं कारयिष्यति। इतः अनुमानितः त्रिचतुर्होरासु मिर्जापुरजनपदं प्राप्य तत्रत्यः ऐतिहासिकचुनारकिल्लायाः भ्रमणं कारयिष्यति । अष्टहोराणां यात्रा प्रातः नववादने घट्टतः आरप्स्यते। सायं षड्वादनपर्यन्तं क्रूजयानं पर्यटकान् स्वीकृत्य पुनः काशीं प्राप्स्यति। अलकनन्दाक्रूजयानपङ्क्त्याः निदेशकेन विकाससमालवीयेन उक्तं यत् क्रूजयाने केवलं भवद्भिः आगन्तव्यम् । क्रूजयाने मनोरञ्जनस्य वाराणस्याः भोज्यपदार्थानां व्यवस्था अलकनन्दापक्षतः भविष्यति । प्रातः अल्पाहारस्य व्यवस्था आरभ्य मध्याह्नभोजनस्य सायम् अल्पाहारस्य च व्यवस्था अपि भविष्यति। साक्षात् सङ्गीतप्रसारणस्य आनन्दं स्वीकुर्वता भवन्तः चत्वारिंशत्यधिकैकशतकिलोमीटरमितायां गङ्गायात्रायां धार्मिकदर्शनम् अपि भविष्यति, तत्रैव पर्यटकाः भारतस्य समृद्धः वंशानुक्रमः ऐतिहासिककिला अपि दृक्ष्यन्ते। साकमेव अनुभवीयात्रामार्गदर्शकानां समूहः अपि भविष्यति। यैः अस्यां यात्रायां धार्मिकस्य, आध्यात्मिकस्य, ऐतिहासिकस्य स्वरूपाणां सूचना अपि प्रदास्यते। सर्वाभिः अत्याधुनिकसुविधाभिः सह एषा यात्रा प्रतिव्यक्तेः केवलं त्रिसहस्ररुप्यकेषु भविष्यति अपि च यदि दशजनानां चिटिका एकेन साकेन स्वीकरोति तर्हि जनद्वयस्य करते निःशुल्कं भविष्यति। आगम्यमाने समये क्रूजयाने कैथीस्थितं मार्कण्डेयमहादेवमन्दिरपर्यन्तम् अपि पर्यटकाः गन्तुं शक्ष्यन्ते। उत्तरभारतस्य एषा स्वसदृशा प्रथमा पर्यटनस्य सेवा भविष्यति।

## समागच्छत वः तृप्तिं करोमि ज्ञान-धारया



उ.प्र. संस्थानेन व्यास पुरस्कारेण पुनश्च नवदेहल्यां 'आज का प्रहरी' तिपक्षतः राष्ट्रीय- गौरव सम्मानेन साभाजिता गङ्गारत्नआचार्या कमला पाण्डेय महोदया तत्रोपस्थितान् समान् चलचित्र-निर्माता-निर्देशकान् अभिनेत्र्न् च संस्कृत -संभाषणाय आमन्त्रितवती। अर्बुदसंख्याकान् किंबहुना ततोऽप्यधिकान् धनान् व्ययीकृत्य पौराणिक- धारावाहिकाः चलचित्राः च निर्मीयन्ते। उत्तमं रंगमँचम्, उत्कृष्टम् आहार्यं, सुंदरं पात्रसंचयनं,भाव- ग्राही अभिनयः एत्सर्वं विधाय अपि अशुद्ध-संस्कृत-संवादानां सम्प्रेषणेन बहुतरं क्लेशमनुभवति तावद् देववाणी संस्कृतम्। यदिहास्ति स्थाने यदिहस्ति,सत्यम् अक्रोध इत्यस्य सत्यं क्रोध इत्युच्चारणं विपरीतम् अर्थं कथयति।एवं सर्वत्र त्रुटीनामेव प्रसारणं विधीयते चलचित्रेषु धारावाहिकेषु च। आचार्या तान् उक्तवती अत्यल्पेन धनेन ते संस्कृत-विद्वद्भिःसह संपर्कं विधाय सरलतया शुद्धमुच्चारणं कर्तुं पारयेयुः। आचार्या पाण्डेय -महोदया स्वकीयं यूट्यूब ळंदहंजंद कवबजवत ज्ञंउंसं चंदकमल बेंदमस द्रष्टुं प्रेरितवती किल तत्रोपस्थितान् सर्वान्। किंच यदि कोऽपि परिशुद्धतायाः कृते तत्र भवतीम् अनुरुणद्धि चेद्, अति-सरल-सहज- रूपेण सा तं शिक्षयिष्यति सर्वासाम् अशुद्धीनां च निवारणं विधास्यति।येन विश्वपटले मनोहरमाध्यमेन संस्कृत -शिक्षायाः प्रसारो भवेदिति तस्या अभिमतम्। वयं सर्वे संस्कृत-सेवकाः तस्या अभिमतस्य समर्थनं कुर्मः।

# राष्ट्रपतिना रामनाथकोविदेन करिष्यते उत्तरप्रदेशस्य प्रथमस्य आयुषविश्वविद्यालयस्य शिलान्यासः

गोरखपुर। गोरखपुरजनपदस्य भटहटखण्डउपखण्डस्य पिपरीखतरकुलहीखक्षेत्रायां निर्मीयते राज्यस्य प्रथमस्य आयुषविश्वविद्यालयस्य शिलान्यासः अगस्तमासस्य अष्टाविंशे दिनाङ्के राष्ट्रपतेः रामनातकोविंदस्य हस्तयोः भविष्यति । शिलान्यासस्समारोहं भव्यं स्मरणीयं च निर्मातुं मुख्यमन्त्रिणा योगिना आदित्यानाथेन स्वयमेव व्यवस्थासु दृष्टिः स्थाप्यते । मङ्गलवासरे मध्याह्ने मुख्यमन्त्री योगी आदित्यनाथः लखनऊतः वायुयानेन साक्षात् समारोहस्थले निर्मितं हेलीपैडस्थलं प्राप्तवान् । तत्र तेन सज्जतायाः निरीक्षणं कृतम् अपि च अधिकारिभ्यः आवश्यकः निर्देशः दत्तः ।

भटहटखण्डउपखण्डस्य पिपरीक्षेत्रे शिलान्याससमारोहाय चिह्नितस्थले प्राप्ते सति एव मुख्यमन्त्रिणा योगिना स्वच्छता, मुख्यमञ्चं, सुरक्षागृहं, दर्शकदीर्घा चेत्यादिनाम् अवलोकनं कृतम् । तेन अधिकारिणः निर्दिष्टः यत् राष्ट्रपतेः कार्यक्रमस्य समये न तु कुत्रापि स्वच्छातायां न्यूनता आगन्तव्या नैव कश्चिद् अपि जनम् असुविधा भवेत्। मुख्यमन्त्रिणा पिपराइचजनपदस्य विधायकेन महेन्द्रपालसिंहेन, जिल्लाधिकारिणा विजयकिरणखआनन्देन उक्तं यत् समारोहे ये जनाः आमन्त्रणीयाः , तेषां सूची समयेन निर्मिता भवेत् । मुख्यमन्त्रिणा उक्तं यत् राष्ट्रपत्याह कार्यक्रमानन्तरम् अपि सुरक्षाव्यवस्थासु ध्यानं दातुम् आवश्यकता अस्ति । कार्यक्रमसमाप्तेः अनन्तरं जनानां गमनान्तरं काचिद् अपि अव्यवस्था न भवेत्। इतः पूर्वं अगस्तमासस्य पञ्चदिनाङ्के अपि मुख्यमन्त्रिणा सज्जतायाः निरीक्षणं कृतम् ।

बालान् यूनः च दृष्ट्वा स्थितः मुख्यमन्त्री योगी, पृष्टवान् कथं सन्ति भवन्तः ?

पिपरीक्षेत्रे आयुषविश्वविद्यालयस्य शिलान्याससमारोहस्य सज्जतानां निरीक्षणानन्तरं मुख्यमन्त्री यदा हैलीपैडस्थलं प्रति वध



ंन्ति स्म, तदा तस्य दृष्टिः समूहे संलग्नाः बालेषु युवसु च गता । चिरपरिचितभावनया हसन् मुख्यमन्त्री योगी किञ्चित् कालपर्यन्तम तत्रैव तिष्ठवान् । बहु आत्मीयतया मुख्यमन्त्रिणा पृष्टं, कथं सन्ति भवन्तः सर्वे ? कापि समस्या तु नास्ति ? कापि समस्या भवेत् तर्हि निःसंकोचेन वक्तव्यम् । उत्तरप्रदेशस्य प्रधानस्य एतं सम्बन्ध ं दृष्ट्वा उपस्थिताः बालाः, युवानः च निःशब्दाः आसन् । उच्चस्वरेण करतलध्वनिं कृत्वा अपि च जयश्रीरामस्य उद्घोषं कृत्वा तैः मुख्यमन्त्रिणं योगिनं प्रति स्वीयाः भावाः प्रकटीकृताः।

# महिलाभ्यः स्वावलम्बिनं कर्तुं प्रदास्यते कौशलप्रशिक्षणम्

लखनऊ। मुख्यमन्त्रिणा योगिना आदित्यनाथेन प्रदेशस्य महिलाभ्यः पुत्रीभ्यश्च अन्तिमपङ्क्त्याः प्रथमपङ्क्तौ आनयनस्य कार्यं कृतम् । अस्मिन् क्रमे विभिन्नाः स्वर्णिमयोजनाः आरभ्य महिलाभ्यः स्वावलम्बनस्य मार्गः दर्शितः। प्रदेशस्य महिलाभिः अधुना प्रत्येकस्मिन् क्षेत्रे प्रगत्याः कथां लिख्यन्ति । प्रदेशे मिशनशक्त्याः तृतीयचरणे पृथक् पृथक् विभागानां पक्षतः विभिन्नानां कार्यक्रमाणाम् आयोजनं क्रियते तत्रैव महिलानां पगाः वृत्त्याः पथे वर्धयितुं कार्यं क्रियते । मिशनशक्त्याः तृतीयचरणान्तर्गतं नगरविकासविभागपक्षतः व्यक्तिगतसंस्थासु, व्यापारिकप्रतिष्ठानेषु, वित्तसंस्थानेषु, चिकित्सालयेषु, विभिन्नकार्यालयेषु च कार्यरतानां महिलानां कार्यस्थले जागरूकं करिष्यते ।



नगरविकासविभागपक्षतः महिलाकर्मिभ्यः, नगरनिगमस्य महिलापार्षदेभ्यः, सभासदेभ्यः एतन्निमित्तं विशेषदायित्वं प्रदत्तम् । अवकरप्रबन्धनेन, जैविकावकरेन गृहखाद्यस्य, कृत्रिमस्य उपयोगः स्थगयितुं जागरूकताकार्यक्रमाणाम् आयोजनं करिष्यते अपि च महिलाभिः स्वीयनगराणां स्वच्छातायाम् अपि निर्णायकभूमिका निर्वक्ष्यन्ते । मिशनशक्त्याः तृतीयचरणे नगरनिगमेषु, नगरपालिकासु महिलासभासदानां, पार्षदानां, महिलाकर्मचारिणां, नगरस्य सामाजिकमहिलानां च वार्डस्तरे गोष्ठ्यः आयोजयिष्यन्ते ।

वृत्त्याः पथे वर्धयिष्यन्ते महिलानां पगाः विभागपक्षतः महिला स्वावलम्बिनं कर्तुं विभिन्नानि कौशलप्रशिक्षणानि प्रदास्यन्ते । अनेन साकमेव सञ्चारिरांगस्य मस्तिष्कज्वरस्य नियन्त्रणाय विशेषाभियानं सञ्चालयिष्यते । कौशलोन्नयनाय मलिनबस्तिषु मिशनशक्त्यान्तर्गतं जिलानगरीयविकाससंस्थाद्वारा स्वयंसहायतासमूहस्य गठनं रोजगारप्रशिक्षणं च प्रदास्यते ।

# निःशुल्कं शिक्षया वर्धाप्यते संस्कृतभाषा, चर्तुदशजिल्लासु सञ्चाल्यन्ते केन्द्राणि, मेरठे अपि पञ्च केन्द्राणि

## मनसः वार्ताद्वारा प्रख्यातः संस्कृतशिक्षकः डॉ. नरेन्द्रः

मेरठम्। प्रधानमन्त्रिणः नरेंद्रमोदिनः 'मन की बात' कार्यक्रमस्य सप्तचत्त्वारिंशत्तमे संस्करणे एकवारं पुनः मेरठं प्रख्यातम्। कार्यक्रमे संस्कृत दिवसम् अभिलक्ष्य देशवासिनः संबोधयता प्रधानमन्त्रिणा मोदिना अस्मिन् कार्यक्रमे मेरठस्य संस्कृतशिक्षकः डा.नरेंद्र पांडेयः संस्कृतं शिक्षयन् दर्शितः । प्रधानमन्त्रिणा भाषितं यत् श्रावणपूर्णिमायाः दिने श संस्कृतदिवसः समाचर्यते। तेनोक्तं यत् सर्वेषां जनानाम् अहम् अभिनन्दनं करोमि। ये संस्कृतभाषां जनसामान्यपर्यन्तं प्रापयितुं लग्नाः सन्ति । तेनोक्तं संस्कृतम् एका एतादृशीभाषा अस्ति। यया स्वीयवार्ता अत्यन्तम् अल्पशब्दैः व्यक्तीकर्तुं शक्यते। वेदकालतः वर्तमानपर्यन्तं संस्कृतभाषा अपि ज्ञानस्य प्रचारे प्रसारे च महती भूमिका निर्व्यूढा। संस्कृतभारतीसंस्थाद्वारा मेरठ-सहारनपुर-मुरादाबादमंडलानां चतुर्दशजिल्लासु संस्कृतशिक्षणस्य कार्यं निश्शुल्कं सञ्चाल्यते।



मेरठे अपि पञ्चकेन्द्राणि चलन्ति। तत्र रेलस्थानकमार्गचतुष्पथस्थिते गौरीशंकरमहादेवमंदिरे संस्कृतभारतीकार्यालये डॉ . नरेंद्र पांडेयः जनेभ्यः निश्शुल्कं संस्कृतं शिक्षते। अपि च जागृतिविहारे, मलियाना, कंकरखेड़ा, नई मोहनपुर्याम् अपि एकं केन्द्रं संचाल्यते। गताष्टाविंशतिवर्षेभ्यः निश्शुल्कं संस्कृतशिक्षणस्य कार्यं कुर्वाणः असौ हरिद्वारस्थितगुरुकुल कांगड़ीविश्वविद्यालयतः भागवद्गीतायां प्रबन्धनविषयम् अवलम्ब्य शोधमकरोत् । प्रधानमन्त्रिणा मोदिना प्रशंसितं यत् विंशतिहोरासु संस्कृतं शिक्ष्यते संस्कृतशिक्षकः डॉ नरेंद्र पांडेयः अभाषत यत् अत्र कश्चिदपि संस्कृतम् अध्येतुम् आगन्तुं शक्नोति। प्रतिसप्ताहं 195 जनाः संस्कृतं पठितुम् आयान्ति। पूर्वमपि प्रख्यातं मेरठं तत्र प्रधानमन्त्रिणः 'मन की बात' कार्यक्रमे।

# हैदराबाद-नगरे संस्कृतदिवसावसरे ग्रन्थलोकार्पणसभा

श्रावणपौर्णिमायां संस्कृतदिवस-समारोह-संरम्भे हैदराबाद-नगरे प्राध्यापकस्य जवाहर्लाल् नेहरू केन्द्रीय विश्वविद्यालयस्य आचार्यस्य प्रो. चौडूरि उपेन्द्रराव महोदयस्य "महाकवि माघुनि उपमलु" (महाकवेर्माघस्य उपमाः) इत्याख्यस्य ग्रन्थस्य लोकार्पणसभा समनुष्ठिता । सभा एषा सुरभारत्याः तत्त्वधाने समायोजिता। कार्यक्रमोऽयं हैदराबादनगरस्य सुप्रसिद्धे उस्मानिया विश्वविद्यालये विद्यमानायाः सुरभारतीसमित्याः भवन-सभागारे सम्पन्ना।

कार्यक्रमस्य आध्यक्ष्यं हैदराबाद केन्द्रीय विश्वविद्यालयस्य कुलाधिपतिभिः, न्यायाधीशैः च श्री एल् नरसिम्हा रेड्डि महोदयैः निर्व्यूढम्। सम्मानितातिथिरूपेन उस्मानिया विश्वविद्यालयस्य कुलपतिः प्रो. रवीन्द्र महोदयाः समागताः।

ग्रन्थस्य समीक्षा संस्कृतविभागाध्यक्षेण प्रो. विद्यानन्देन, सुविख्यातैराचार्यैः प्रो. कसिरेड्डि वर्यैः च कृतम्।





सभायां मुख्यातिथि-पदमलंकुर्वाणाः केन्द्र-संस्कृति-पर्यटन-पूर्वोत्तरराज्यानां च मन्त्रिवर्याः मान्याः श्री जि. किषन् रेड्डिवर्याः ग्रथलेखकस्य प्रो. चौडूरि उपेन्द्रराव महोदयस्य भूरि प्रशंसामकुर्वन्। तैरुक्तं यत्, उपेन्द्र राव वर्याः नैकग्रन्थलेखकाः, सुरभारतीसमुपासकाः च इति। संस्कृत विषये तैरुक्तं, "अहं बहुषु पाश्चात्यराष्ट्रेषु प्रवासमकरवं परन्तु कुत्रापि आंग्लभाषायाः प्रयोगो मया नैव दृष्टः, सर्वत्र स्वस्वभाषाः एव समाद्रियन्ते, भारतस्य वास्तविकी भाषा संस्कृतभाषा एव, अतः वयम् सर्वे संस्कृते एव वदेम" इति।

अखिल भारतीय विद्यार्थि परिषदः पूर्वाध्यक्षैः प्रो. मुरली मनोहर महोदयैः संस्कृतोत्थानविषये स्वीयविचाराः प्रस्तुताः ।

सभायां उस्मानिया विश्वविद्यालयस्य संस्कृतविभागस्य अध्यापकाः, शोधच्छात्राः अपि च अन्ये बहवः संस्कृतप्रेमिणः उपस्थिताः आसन्। कार्यक्रमस्य संचालनं प्रो. रामुलु वर्येण कृतम्। डा रजेन्द्र प्रसाद-डा. गोपालकृष्ण-नायकादीनां परिश्रमेण कार्यक्रमः सफलो जातः ।

## 'यजुर्वेदीयब्राह्मणाधारितं प्राचीनवास्तुविज्ञानविषयं प्रति व्याख्यानम्

'यजुर्वेदीयब्राह्मणाधारितं कृत्वा प्राचीनवास्तुविज्ञान' विषयं प्रति वेव्ससंस्थायाः बेंगलुरूचौपटर एवं नाद वेद अध्ययन केंद्रस्य संयुक्ततत्वावधाने अगस्तमासस्य एकोनत्रिंशद्दिनाङ्के व्याख्यानं संस्थापितम्। एतत् व्याख्यानप्रवचनं मलिकायाः अष्टमं व्याख्यानम् आसीत्। कार्यक्रमस्य आरम्भः प्रो. सीएल प्रभाकरः वेव्सबेंगलुरुशाखायाः अध्यक्षस्य उद्बोधनेन जातः एतस्य व्याख्यानस्य मुख्यवक्त्री डा. अपर्णा (धीर)



खण्डेलवालः, सह-प्रवक्ता (स्कूल ऑफ इण्डिक स्टडीज, इंस्टिट्यूट ऑफ एडवांस्ड साइंसेज, डार्टमोथ), एम ए , यू एस ए - प्रशासनिक सचिव, वेव्ज इंडिया च वर्तते। तेन स्वमुख्ये उद्बोधने यजुर्वेदिब्राह्मणम् अर्थात् शुक्लयजुर्वेदीयं शतपथब्राह्मणं कृष्णयजुर्वेदीयतेतरीयब्राह्मणं च आधारीकृत्य प्राचीनवास्तुविज्ञानं प्रति प्रकाशः क्षिप्तः। तस्य उद्बोधनस्य मुख्याः दश विषयाः आसन्। यथा इष्टिकानां ज्ञानं, दिशां ज्ञानं, खननक्रियायाः ज्ञानं, मापनस्य विधेः ज्ञानं, गृहवाचकशब्दस्य प्रचलनं, वास्तुशैल्याः प्रचलनं, यज्ञवेद्याः स्थानस्य चयनसिद्धांतः, वेदीनिर्माणस्य सिद्धांतः, श्मशाननिर्माणस्य सिद्धांतश्च।

सार्धम् अस्मिन् कार्यक्रमे श्रीमद् भागवतपुराणे गृहीतसप्तशतश्लोकाधारितस्य श्भागवतसप्तशतीश ग्रंथस्य अपि लोकार्पणं जातम्।

कार्यक्रमे वेव्स भारतस्य अध्यक्षा प्रो. शशि तिवारी, डॉ राघव बोड्डूपल्ली, डॉ धनंजय भांजा ,डॉ. सरस्वती प्रमोदी, दिव्यांश धीरः, डॉ. धर्मा , डॉ. नीलमः, डॉ सुषमा देवी, डॉ. गोविंद राजः, प्रो. के एस इत्यादिभिः प्रश्नकाले कार्यक्रमे भागं गृहीतवन्तः।

अस्मिन् कार्यक्रमे देशस्य विदेशस्य च बहवः विद्वांसः सम्मिलिताः ।येषु वेब्ससदस्याः अपि सन्ति।

## संस्कृतभारतीबदायूंद्वारा समाचरितः संस्कृतदिवसः

प्राचीनमान्यतानुसारं श्रावणमासस्य पूर्णिमायां संस्कृतस्य प्राकट्यम् अभवत् , ततः अद्य पर्यन्तं संस्कृतदिवसः समाचर्यते। संस्कृतभारत्याः सदस्याः हिन्दूजूनियरमाध्यमिकविद्यालयबदायूंनगरे संस्कृतदिवसः हर्षोल्लासेन सह समाचर्यते। कार्यक्रमारम्भे अश्विनीभारद्वाजः प्रबन्धकः जी.



बी.पंतः , राष्ट्रियब्राह्मणचेतनापरिषदः जिल्लाध्यक्ष। पं.प्रदीप दुबे, डॉ.अवस्थी च सरस्वत्याः समक्षं दीपप्रज्वलनम् अकुर्वन्।

संस्कृतभारत्याः नगरसंरक्षकः डॉ.राधेश्याम अवस्थी संस्कृतदिवसस्य परम्परा-अर्वाचीनता-आवश्यकतादिविषय स्वीयवक्तव्यं प्रस्तुतवान्। सं.भा.साहित्यप्रमुखः श्रीमान् रामप्रकाश शास्त्री संस्कृतस्य महत्त्वं बोधयन् सर्वप्रथमं गृहस्य वातावरणं संस्कृतमयं भवेत्, सं.भा. विभागप्रमुखः श्री सर्वेश कुमारः संस्कृतगीत तत् संरक्षणताम् उपादेयतां प्रति कथनं कृतम्।, पं.मनू मिश्रः सरस्वतीवन्दनां प्रस्तूय स्ववक्तव्यं दत्तम्, आचार्यः शब्देन्दुः देवभाषायां कार्यक्रमस्य संचालनं, संस्कृतस्य संरक्षणं,संवर्द्धनं जनजनपर्यन्तं संस्कृतं प्रापयितुम् उपायः बोधितः।, पं.प्रदीप दुबे संस्कृतस्म्य संस्कृतेः इतिहासं महत्त्वं च व्याख्यातवान्, पं.शिवेम दुबे गणेश वन्दनां प्रास्तौत् , कामाक्षी शर्मा संस्कृतगीतं प्रस्तुतवती अवसरे अस्मिन् श्रीमान् अजय मिश्रः, सर्वेन्द्र पाठकः ,विनय दुबे,प्रमोद मिश्रा,प्रशान्त मिश्रः, अमन भारद्वाजः, अभय भारद्वाजः, नकुल भारद्वाजः, आयुष भारद्वाजः, डा.प्रतिभा मिश्रा, श्रीमती इन्द्राणी पाठकश्च उपस्थिताः आसन्।

उत्तराखंडस्य पावनदेवभूमौ हरिद्वारस्थिते श्रीभगवानदासादर्श संस्कृतमहाविद्यालये प्राचार्यपदे आसीनाय संस्कृतस्य विद्वतापूर्णशिक्षां प्रदात्रे आचार्याय डॉ. निरंजन मिश्राय उत्तर प्रदेश संस्कृत संस्थान, लखनऊद्वारा तत् विद्वतापूर्णकृतये 'दामिन्यै' 51000/-प्ररूप्यकात्मिकः सिद्धःरुबाणभट्ट;पुरस्कारः दास्यते इति घोषणा कृता। आचार्यबाणस्य परम्परां वर्धयितुम् आचार्य निरंजन मिश्रस्य काव्यवर्णनशैलीमहाकवि बाणभट्टस्य समानम् अनुकरणीयं वर्तते। काव्यशैल्यां वर्णननैपुण्यं, निरीक्षणप्रज्ञा, कविप्रतिभा, शास्त्रवैदुय्यं, रसभावघनता, अलंकारचमत्कृतिः, रीतिप्रौढता इत्यादिकगुणानां पूर्णः उन्मेषः वर्तते।



भारत-सर्वोच्चन्यायालयस्य न्यायाधीशपदभूषयिता श्रीः पि एस् नरसिंहमहोदयः संस्कृतज्ञः

भारतसर्वोच्चन्यायालये न्यायाधीशरूपेण नियुक्तः शास्त्रानुकुलः सुधीः उन्नतपदं विभूषयति।

भारत-सर्वोच्चन्यायालयस्य न्यायाधीशपदभूषयिता श्रीः पि एस् नरसिंहमहोदयः संस्कृतज्ञः। अधिवक्तणां शास्त्रपण्डितानां च गणं कृत्वा Evidence । बज इत्यादीनां न्यायशास्त्रदृष्ट्या परिशीलनकार्यम् अपि आरब्धवान् आसीत्। शास्त्रनिष्ठः कश्चन सर्वोच्चः न्यायाधीशः भविष्यति इति भारतस्य अहोभाग्यम्।



अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारी, डॉ. राधेश्यामअवस्थी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलः- डॉ.सुन्दरनारायणझा, डॉ. सुरेन्द्रमहतो, डॉ. सन्नीकुमार, डॉ. संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।